ॐ

॥ शिव स्तोत्राणि ॥

नमः शिवाय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥



हर हर महादेव

॥ श्रीहरिः ॥

॥ शिव स्तोत्राणि एवं कवचम् ॥

अनुक्रमाणिका

1. शिव के विभिन्न स्वरुपों का ध्यान 02
2. शिव मानस पूजा 05
3. वैद्यनाथाष्टकम् स्तोत्रम् 06
4. लिंगाष्टकम् स्तोत्रम् 07
5. बिल्वाष्टम् स्तोत्रम् 08
6. रुद्राष्टकम् स्तोत्रम् (तुलसी कृत) 09
7. शिवाष्टकम् स्तोत्रम् (शंकराचार्य) 10
8. शिवाष्टकम् स्तोत्रम् (अगस्त्य कृत) 11
9. शिव पंचाक्षर स्तोत्रम् 12
10. शिव षडाक्षर स्तोत्रम् 13
11. शिवरक्षा स्तोत्रम् 14
12. द्वादश ज्योतिर्लिंग स्तोत्रम् 15
13. दारिद्र दहन शिव स्तोत्रम् 16
14. काल भैरवाष्टकम् स्तोत्रम् 17
15. पाशुपत स्तोत्रम् 18
16. नीलकंठ स्तोत्रम् 19
17. शिव ताण्डव स्तोत्रम् 20
18. दक्षिणामूर्ति स्तोत्रम् - 1 21
19. दक्षिणामूर्ति स्तोत्रम् - 2 22
20. शम्भुनटनम् स्तोत्रम् (पतंजलि कृत) 24
21. महामृत्युंजय स्तोत्रम् - 1 26
22. महामृत्युंजय स्तोत्रम् - 2 27
23. शिव महिम्नः स्तोत्रम् 28
24. शिव अपराध क्षमा स्तोत्रम् 31
25. उमा महेश्वर स्तोत्रम् 33
26. पशुपत्यष्टकम् स्तोत्रम् 34
27. विश्वनाथाष्टकम् स्तोत्रम् 35
28. शिव स्तुतिः 36
29. महा मृत्युंजय कवचम् 37
30. मृतसंजीवन कवचम् 38
31. अमोघ शिव कवचम् 39
32. ब्रह्माण्ड विजय शिव कवचम् 43
33. रुद्र कवचम् 45
34. शिव अष्टोत्तरशतनाम स्तोत्रम् - 1 47
35. शिव अष्टोत्तरशतनाम स्तोत्रम् - 2 48
36. शिव अष्टोत्तरशत नामावलि 49
37. शिव सहस्रनाम स्तोत्रम् 50
38. शिव सहस्र नामावली 54
39. शिव जी की आरती 64
40. गंगाधर जी की आरती 65

॥ शिव के विभिन्न स्वरुपों क ध्यान ॥

- **भगवान सदाशिव**

  यो धत्ते भुवनानि सप्त गुणवान् स्रष्टा रजः संश्रयः,
  संहर्ता तमसान्वितो गुणवतीं मायामतीत्य स्थितः ।
  सत्यानन्दमनन्तबोधममलं ब्रह्मादिसंज्ञास्पदं,
  नित्यं सत्त्वसमन्वयादधिगतं पूर्णं शिवं धीमहि ॥

- **परमात्मप्रभु शिव**

  वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी,
  यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
  अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते,
  स स्थाणुः स्थिरभक्तियोगसुलभो निः श्रेयसायास्तु वः ॥

- **मङ्गलस्वरूप शिव**

  कृपाललितवीक्षणं स्मितमनोज्ञवक्त्राम्बुजं,
  शशाङ्ककलयोज्ज्वलं शमितघोरतापत्रयम् ।
  करोतु किमपि स्फुरत्परमसौख्यसच्चिद्वपु-,
  र्धराधरसुताभुजोद्वलयितं महो मङ्गलम् ॥

- **भगवान अर्धनारीश्वर**

  नीलप्रवालरुचिरं विलसत्त्रिनेत्र,
  पाशारुणोत्पलकपालत्रिशूलहस्तम् ।
  अर्धाम्बिकेशमनिशं प्रविभक्तभूषं,
  बालेन्दुबद्धमुकुटं प्रणमामि रूपम् ॥

  - यो धत्ते निजमाययैव भुवनाकारं विकारोज्झितो,
    यस्याहुः करुणाकटाक्षविभवौ स्वर्गापवर्गाभिधौ ।
    प्रत्यग्बोधसुखाद्वयं हृदि सदा पश्यन्ति यं योगिन-,
    स्तस्मै शैलसुताञ्चितार्धवपुषे शश्वन्नमस्तेजसे ॥

- **भगवान शंकर**

  वन्दे वन्दनतुष्टमानसमतिप्रेमप्रियं प्रेमदं,
  पूर्णं पूर्णकरं प्रपूर्णनिखिलैश्वर्यैकवासं शिवम् ।
  सत्यं सत्यमयं त्रिसत्यविभवं सत्यप्रियं सत्यदं,
  विष्णुब्रह्मनुतं स्वकीयकृपयोपात्ताकृतिं शङ्करम् ॥

- **गौरीपति भगवान शिव**

  विश्वोद्भवस्थितिलयादिषु हेतुमेकं,
  गौरीपतिं विदिततत्त्वमनन्तकीर्तिम् ।
  मायाश्रयं विगतमायमचिन्त्यरूपं,
  बोधस्वरूपममलं हि शिवं नमामि ॥

रत्नाकल्पो ज्ज्वलाङ्गं परशुमृगवरा भीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चववत्न त्रिनेत्रम् ॥

- **पञ्चमुख सदाशिव**

मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पञ्चभि-,
स्त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् ।
शूलं टङ्ककृपाणवज्रदहनान् नागेन्द्रघण्टाङ्कुशान्,
पाशं भीतिहरं दधानममिताकल्पोज्चलं चिन्तयेत् ॥

- **अम्बिकेश्वर**

आद्यान्तमङ्कलमजातसमानभाव,
मार्य तमीशमजरामरमात्मदेवम् ।
पञ्चाननं प्रबलपञ्चविनोदशीलं,
सम्भावये मनसि शङ्करमम्बिकेशम् ॥

- **पार्वतीनाथ पञ्चानन**

शूलाही टङ्कघण्टासिशृणिकुलिशपाशाग्न्यभीतीर्दधानं,
दोर्भिः शीतांशुखण्डप्रतिघटितजटाभारमौलिं त्रिनेत्रम् ।
नानाकल्पाभिरामापघनमभिमतार्थप्रदं सुप्रसन्नं,
पदस्थं पञ्चवक्त्रं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

- **भगवान महाकाल**

स्रष्टारोऽपि प्रजानां प्रबलभवभयाद् यं नमस्यन्ति देवा,
यश्चित्ते सम्प्रविष्टोऽप्यवहितमनसां ध्यानमुक्तात्मनां च ।
लोकानामादिदेवः स जयतु भगवाञ्छ्रीमहाकालनामा,
बिभ्राणः सोमलेखामहिवलययुतं व्यक्तलिङ्गं कपालम् ॥

- **श्री नीलकण्ठ**

बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्चलं,
नागेन्द्रैः कृतभूषणं जपवटीं शूलं कपालं करैः ।
खट्वाङ्गं दधतं त्रिनेत्रविलसत्पञ्चाननं सुन्दरं,
व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकण्ठं भजे ॥

- **पशुपति**

मध्याह्नार्कसमप्रभं शशिधरं भीमाट्टहासोज्चलं,
त्र्यक्षं पन्नगभूषणं शिखिशिखाश्मश्रुस्फुरन्मूर्धजम् ।
हस्ताब्जैस्त्रिशिखं समुद्गरमसिं शक्तिं दधानं विभुं,
दंष्ट्राभीमचतुर्मुखं पशुपतिं दिव्यास्त्ररूपं स्मरेत् ॥

- **भगवान दक्षिणामूर्ति**

मुद्रां भद्रार्थदात्रीं सपरशुहरिणां बाहुभिर्बाहुमेकं,
जान्वासक्तं दधानो भुजगवरसमाबद्धकक्षो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटः क्षीरगौरस्त्रिनेत्रो,
दद्यादाद्यैः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो वः ॥

- **महामृत्युञ्जय**

हस्ताभ्यां कलशव्दयामृतरसैराप्लावयन्तं शिरो,
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम् ।
अङ्कन्यस्तकरद्वयामृतघटं कैलासकान्तं शिवं,
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥

- हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः,
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ ।
अक्षस्त्रङ्मृगहस्तमम्बुजगतं मूर्धस्थचन्द्रस्रव-,
त्पीयूषार्द्रतनुं भजे सगिरिजं त्र्यक्षं च मृत्युञ्जयम् ॥

- **द्वादश ज्योतिर्लिंग**

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालम्ॐकारममलेश्वरम् ॥ १॥

- परल्यां वैद्यनाथं च डाकिन्यां भीमाशंकरम्।
सेतुबंधे तु रामेशं नागेशं दारुकावने ॥ ॥ २॥
- वाराणस्यां तु विश्वेशं त्र्यंबकं गौतमीतटे।
हिमालये तु केदारम् घुश्मेशं च शिवालये ॥ ३॥
- एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥ ॥ ४॥

॥ शिव मानस पूजा ॥

- रत्नैः कल्पित मासनं हिमजलैः स्नानं च दिव्याम्बरं,
  नाना रत्न विभूषितम् मृग मदा मोदांकितम् चंदनम् ।
  जाती चम्पक बिल्वपत्र रचितं पुष्पं च धूपं तथा,
  दीपं देव दयानिधे पशुपते हृत्कल्पितम् गृह्यताम् ॥ ॥ १॥

- सौवर्णे नवरत्न खंड रचिते पात्रे घृतं पायसं,
  भक्ष्मं पंचविधं पयोदधि युतं रम्भाफलं पानकम् ।
  शाका नाम युतं जलं रुचिकरं कर्पूर खंडो ज्ज्वलं,
  ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २॥

- छत्रं चामर योर्युगं व्यजनकं चादर्शकं निर्मलम्,
  वीणा भेरि मृदंग काहलकला गीतं च नृत्यं तथा ।
  साष्टांग प्रणतिः स्तुति-र्बहुविधा ह्येतत् समस्तं मया,
  संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ॥ ३॥

- आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
  पूजा ते विषयोप भोग रचना निद्रा समाधि-स्थितिः ।
  संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो,
  यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ॥ ४॥

- कर चरण कृतं वाक्कायजं कर्मजं वा,
  श्रवण नयन जं वा मानसं वापराधम् ।
  विहितम विहितं वा सर्वमेतत् क्षमस्व,
  जय जय करुणाब्धे श्री महादेव शम्भो ॥ ॥ ५॥

॥ इति श्री मत् शंराचार्य विरचिता शिवमानस पूजा सम्पूर्णम् ॥

॥ वैद्यनाथाष्टकम् स्तोत्रम् ॥

- श्रीराम सौमित्रि जटायु वेद- षडाननादित्य कुजार्चिताय ।
  श्री नीलकण्ठाय दयामयाय श्री वैद्यनाथाय नमः शिवाय ॥ ॥ १॥

- गंगाप्रवाहेन्दु-जटाधराय त्रिलोचनाय स्मरकालहन्त्रे ।
  समस्त देवैरपि पूजिताय श्री वैद्यनाथाय नमः शिवाय ॥ ॥ २॥

- भक्तः प्रियाय त्रिपुरान्तकाय पिनाकिने दुष्टहराय नित्यम् ।
  प्रत्यक्षलीलाय मनुष्यलोके श्री वैद्यनाथाय नमः शिवाय ॥ ॥ ३॥

- प्रभूतवातादि समस्त रोग- प्रनाशकर्त्रे मुनिवन्दिताय ।
  प्रभाकरेन्द्वग्नि विलोचनाय श्री वैद्यनाथाय नमः शिवाय ॥ ॥ ४॥

- वाक्श्रोत्रनेत्राङ्घ्रि विहीनजन्तोः वाक्श्रोत्रनेत्राङ्घ्रि सुखप्रदाय ।
  कुष्ठादिसर्वोन्नतरोगहन्त्रे श्री वैद्यनाथाय नमः शिवाय ॥ ५॥

- वेदान्तवेद्याय जगन्मयाय योगीश्वरध्येयपदाम्बुजाय ।
  त्रिमूर्तिरूपाय सहस्रनाम्ने श्री वैद्यनाथाय नमः शिवाय ॥ ॥ ६॥

- स्वतीर्थ मृद् भस्मभृतांगभाजां पिशाचदुःखार्तिभयापहाय ।
  आत्म स्वरूपाय शरीरभाजां श्री वैद्यनाथाय नमः शिवाय ॥ ॥ ७॥

- श्री नीलकण्ठाय वृषध्वजाय स्रक्गन्ध भस्माद्य पिशोभिताय ।
  सुपुत्र दारादि सुभाग्यदाय श्री वैद्यनाथाय नमः शिवाय ॥ ॥ ८॥

- वालाम्बिकेश वैद्येश भवरोगहरेति च ।
  जपेन्नामत्रयन् नित्यं महारोग निवारणम् ॥ ॥ ९॥

॥ इति श्री वैद्यनाथाष्टकम् सम्पूर्णम् ॥

॥ लिंगाष्टकम् स्तोत्रम् ॥

ब्रह्ममुरारी सुरार्चित लिंङगं ,
निर्मल भासित शोभित लिंङगं ।
जन्मज दु:ख विनाशक लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ १॥

देवमुनि प्रवारार्चित लिंङगं ,
कामदहन करुणाकर लिंङगं ।
रावण दर्प विनाशक लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ २॥

सर्व सुगंध सुलेपित लिंङगं ,
बुद्धी विवर्धन कारण लिंङगं ।
सिद्ध सुरासुर वंदित लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ ३॥

कनक महामणि भूषित लिंङगं ,
फणिपती वेष्टित शोभित लिंङगं ।
दक्ष सुयज्ञ निनाषन लिंङगं,
तत् प्रणमामि सदाशिव लिंङगं ॥ ४॥

कुंकुम चंदन लेपित लिंङगं ,
पंकज हार सुशोभित लिंङगं ।
संचित पाप विनाशक लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ ५॥

देवागणार्चित सेवित लिंङगं ,
भावै-र्भक्तिभिरेव च लिंङगं ।
दिनकर कोटी प्रभाकर लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ ६॥

अष्टोदलोपरीवेष्टित लिंङगं ,
सर्वसमुद्भव कारण लिंङगं ।
अष्टदरिद्र विनाषन लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ ७॥

सुरगुरु सुरवर पूजित लिंङगं ,
सुरवन पुष्प सदार्चित लिंङगं ।
परात्पर परामात्मक लिंङगं ,
तत् प्रणमामि सदाशिव लिंङगं ॥ ८॥

लिंङगाष्टकमिदं पुण्यं,
य: पठेच्छिव सन्निधौ ।
शिवलोकमवाप्नोती,
शिवेन सह मोदते ॥ ९॥

॥ इति लिंगाष्टकम् सम्पूर्णम् ॥

॥ बिल्वाष्टकम् स्तोत्रम् ॥

- त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधंम् ।
  त्रिजन्म पापसंहारमं एकबिल्वं शिवार्पणम् ॥ ॥ १॥

- त्रिशाखैः बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः।
  शिपूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥ ॥ २॥

- अखण्ड बिल्वपत्रेण पूजिते नन्दिकेश्वरे ।
  शुद्ध्यन्ति सर्वपापेभ्यो एकबिल्वं शिवार्पणम् ॥ ॥ ३॥

- शालग्राम शिलामेकां विप्राणां जातु अर्पयेत् ।
  सोमयज्ञ महापुण्यं एकबिल्वं शिवार्पणम् ॥ ॥ ४॥

- दन्तिकोटि सहस्त्राणि वाजपेयशतानि च ।
  कोटि कन्या महादानं एकबिल्वं शिवार्पणम् ॥ ॥ ५॥

- लक्ष्म्याः स्तनतु उतपन्नं महादेवस्य च प्रियम् ।
  बिल्ववृक्षं प्रयच्छामि एकबिल्वं शिवार्पणम् ॥ ॥ ६॥

- दर्शनं बिल्व वृक्षस्य स्पर्शनं पापनाशनम् ।
  अघोर पाप संहारम् एकबिल्वं शिवार्पणम् ॥ ॥ ७॥

- मूलतो ब्रह्मरुपाय मध्यतो विष्णुरुपिणे ।
  अग्रतः शिवरुपाय एकबिल्वं शिवार्पणम् ॥ ॥ ८॥

- बिल्वाष्टकमिदं पुण्यं यः पठेत् शिव सन्निधौ ।
  सर्वपाप विनिर्मुक्तः शिवलोकमवाप्नुयात् ॥ ॥ ९॥

॥ इति बिल्वाष्टकम् सम्पूर्णम् ॥

॥ रुद्राष्टकम् स्तोत्रम् (तुलसी कृत) ॥

- नमामीशमीशान निर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
  निजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेऽहम् ॥ ॥ १॥

- निराकारमोंकारमूलं तुरीयं गिरा ज्ञान गोतीतमीशं गिरीशम् ।
  करालं महाकाल कालं कृपालं गुणागार संसारपारं नतोऽहम् ॥ ॥ २॥

- तुषाराद्रि संकाश गौरं गभीरं मनोभूत कोटिप्रभा श्री शरीरम् ।
  स्फुरन्मौलि कल्लोलिनी चारु गङ्गा लसद्भालबालेन्दु कण्ठे भुजङ्गा ॥ ३॥

- चलत्कुण्डलं भ्रू सुनेत्रं विशालं प्रसन्नाननं नीलकण्ठं दयालम् ।
  मृगाधीशचर्माम्बरं मुण्डमालं प्रियं शंकरं सर्वनाथं भजामि ॥ ॥ ४॥

- प्रचण्डं प्रकृष्टं प्रगल्भं परेशं अखण्डं अजं भानुकोटिप्रकाशम् ।
  त्रय: शूल निर्मूलनं शूलपाणिं भजेऽहं भवानीपतिं भावगम्यम् ॥ ॥ ५॥

- कलातीत कल्याण कल्पान्तकारी सदा सज्जनानन्ददाता पुरारी ।
  चिदानन्द संदोह मोहापहारी प्रसीद प्रसीद प्रभो मन्मथारी ॥ ॥ ६॥

- न यावद् उमानाथपादारविन्दं भजन्तीह लोके परे वा नराणाम् ।
  न तावत्सुखं शान्ति सन्तापनाशं प्रसीद प्रभो सर्वभूताधिवासम् ॥ ॥ ७॥

- न जानामि योगं जपं नैव पूजां नतोऽहं सदा सर्वदा शम्भु तुभ्यम् ।
  जरा जन्म दु:खौघ तातप्यमानं प्रभो पाहि आपन्नमामीश शम्भो ॥ ॥ ८॥

- रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये ।
  ये पठन्ति नरा भक्त्या तेषां शम्भु: प्रसीदति ॥ ॥ ९॥

॥ इति श्री गोस्वामि तुलसीदास कृतं श्रीरुद्राष्टकं सम्पूर्णम् ॥

॥ शिवाष्टकम् स्तोत्रम् ॥

तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्ज्वलितपिङ्गललोचनाय।
नागेन्द्रहारकृतकुण्डलभूषणाय
ब्रह्मेन्द्रविष्णुवरदाय नमः शिवाय ॥ १॥

श्रीमत्प्रसन्नशशिपन्नगभूषणाय
शैलेन्द्रजावदनचुम्बितलोचनाय।
कैलासमन्दरमहेन्द्रनिकेतनाय
लोकत्रयार्तिहरणाय नमः शिवाय ॥ २॥

पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागरुप्रचुरचन्दनचर्चिताय।
भस्मानुषक्तविकचोत्पलमल्लिकाय
नीलाब्जकण्ठसदृशाय नमः शिवाय ॥ ३॥

लम्बत्सपिङ्गलजटामुकुटोत्कटाय
दंष्ट्राकरालविकटोत्कटभैरवाय।
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथनमिताय नमः शिवाय ॥ ४॥

दक्षप्रजापतिमहामखनाशनाय
क्षिप्रं महात्रिपुरदानवघातनाय।
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्तनाय
योगाय योगनमिताय नमः शिवाय ॥ ५॥

संसारसृष्टिघटनापरिवर्तनाय
रक्षः पिशाचगणसिद्धसमाकुलाय।
सिद्धोरगग्रहगणेन्द्रनिषेविताय
शार्दूलचर्मवसनाय नमः शिवाय ॥ ६॥

भस्माङ्गरागकृतरूपमनोहराय
सौम्यावदातवनमाश्रितमाश्रिताय।
गौरीकटाक्षनयनार्धनिरीक्षनाय
गोक्षीरधारधवलाय नमः शिवाय ॥ ७॥

आदित्यसोमवरुणानिलसेविताय
यज्ञाग्निहोत्रवरधूमनिकेतनाय।
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय
गोपाय गोपनमिताय नमः शिवाय ॥ ८॥

शिवाष्टकमिदं पुण्यं
यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति
शिवेन सह मोदते ॥ ९॥

॥ इति श्री मत् शंकराचार्य विरचितम् श्री शिवाष्टकम् सम्पूर्णम् ॥

॥ शिवाष्टकम् स्तोत्रम् (अगस्त्य कृत) ॥

- अद्य मे सफलं जन्मः चाद्य मे सफलं तपः ।
  अद्य मे सफलं ज्ञानम् शंभो त्वत्पाददर्शनात् ॥ १॥

- कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहं महेश्वर ।
  अद्य ते पादपद्मस्य दर्शनात्भक्तवत्सल ॥ २॥

- शिवश्शंभुः शिवश्शंभुः शिवश्शंभुः शिवश्शिवः ।
  इति व्याहरतो नित्यम् दिनान्यायान्तु यान्तु मे ॥ ३॥

- शिवे भक्तिश्शिवे भक्तिश्शिवे भक्तिर्भवेभवे ।
  सदा भूयात् सदा भूयात्सदा भूयात्सुनिश्चला ॥ ४॥

- आजन्म मरणं यस्य महादेवान्यदैवतम् ।
  मा जनिष्यत मद्वंशे जातो वा द्राग्विपद्यताम् ॥ ५॥

- जातस्य जायमानस्य गर्भस्थस्याऽपि देहिनः ।
  मा भून्मम कुले जन्मः यस्य शंभुर्नदैवतम् ॥ ६॥

- वयं धन्या वयं धन्या वयं धन्या जगत्त्रये ।
  आदिदेवो महादेवो यदस्मत्कुलदैवतम् ॥ ७॥

- हरश्शंभो महादेव विश्वेशामरवल्लभ ।
  शिवश्शङ्कर सर्वात्मन्नीलकण्ठः नमोऽस्तु ते ॥ ८॥

- अगस्त्याष्टकमेतत्तु यः पठेच्छिवसन्निधौ ।
  शिवलोकमवाप्नोति शिवेनस्सह मोदते ॥ ९॥

॥ इति श्री अगस्त्य रचितम् श्री शिवाष्टकम् सम्पूर्णम् ॥

॥ श्री शिव पञ्चाक्षर स्तोत्रम् ॥

श्री शिव पञ्चाक्षर स्तोत्रं के पाँचों श्लोकों में क्रमशः न, म, शि, व और य है। न, म, शि, व और य अर्थात् नमः शिवाय। इसलिए यह पञ्चाक्षर स्तोत्रं शिवस्वरूप माना जाता है।

नागेन्द्रहाराय त्रिलोचनाय ,
भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय ,
तस्मै 'न' काराय नमः शिवाय ॥ १॥

मन्दाकिनीसलिलचन्दनचर्चिताय ,
नन्दीश्वरप्रमथनाथमहेश्वराय।
मन्दारपुष्पबहुपुष्पसुपूजिताय ,
तस्मै 'म' काराय नमः शिवाय ॥ २॥

शिवाय गौरीवदनाब्जवृन्द ,
सूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकण्ठाय वृषध्वजाय ,
तस्मै 'शि' काराय नमः शिवाय ॥ ३॥

वसिष्ठकुम्भोद्भवगौतमार्य ,
मुनीन्द्रदेवार्चितशेखराय।
चन्द्रार्कवैश्वानरलोचनाय ,
तस्मै 'व' काराय नमः शिवाय ॥ ४॥

यक्षस्वरूपाय जटाधराय ,
पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय ,
तस्मै 'य' काराय नमः शिवाय ॥ ५॥

पञ्चाक्षरमिदं पुण्यं ,
यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति ,
शिवेन सह मोदते ॥ ६॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवपञ्चाक्षरस्तोत्रं सम्पूर्णम् ॥

॥ शिव षडाक्षर स्तोत्रम् ॥

- ॐ कार बिन्दुसंयुक्तं नित्यं ध्यायंति योगिनः ।
  कामदं मोक्षदं चैव ऊँकाराय नमो नमः ॥ १॥

- नमंति ऋषयो देवा नमन्त्यप्सरसां गणाः ।
  नरा नमंति देवेशं नकाराय नमो नमः ॥ २॥

- महादेव महात्मानं महाध्यानं परायणम् ।
  महापापहरं देव मकाराय नमो नमः ॥ ३॥

- शिवं शातं जगन्ननाथं लोकानुग्रहकारकम् ।
  शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४॥

- वाहनं वृषभो यस्य वासुकिः कंठभूषणम् ।
  वामे शक्तिधरं वेदं वकाराय नमो नमः ॥ ५॥

- यत्र तत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
  यो गुरु : सर्वदेवानां यकाराय नमो नमः ॥ ६॥

- षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
  शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७॥

॥ इति श्री रुद्रयामले उमा-महेश्वर संवादे शिवषडाक्षर स्तोत्रम् सम्पूर्णम् ॥

॥ शिवरक्षा स्तोत्रम् ॥

विनियोग: अस्य श्रीशिवरक्षास्तोत्रमन्त्रस्य याज्ञवल्क्य ऋषिः । श्री सदाशिवो देवता । अनुष्टुप् छन्दः । श्रीसदाशिवप्रीत्यर्थं शिवरक्षास्तोत्रजपे विनियोगः ॥

- चरितं देवदेवस्य महादेवस्य पावनम् ।
  अपारं परमोदारं चतुर्वर्गस्य साधनम् ॥ ॥ १॥
- गौरीविनायकोपेतं पञ्चवक्त्रं त्रिनेत्रकम् ।
  शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः ॥ ॥ २॥
- गंगाधरः शिरः पातु भालं अर्धेन्दुशेखरः ।
  नयने मदनध्वंसी कर्णो सर्पविभूषण ॥ ॥ ३॥
- घ्राणं पातु पुरारातिः मुखं पातु जगत्पतिः ।
  जिह्वां वागीश्वरः पातु कंधरां शितिकंधरः ॥ ॥ ४॥
- श्रीकण्ठः पातु मे कण्ठं स्कन्धौ विश्वधुरन्धरः ।
  भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् ॥ ॥ ५॥
- हृदयं शंकरः पातु जठरं गिरिजापतिः ।
  नाभिं मृत्युञ्जयः पातु कटी व्याघ्राजिनाम्बरः ॥ ॥ ६॥
- सक्थिनी पातु दीनार्तशरणागतवत्सलः ।
  उरू महेश्वरः पातु जानुनी जगदीश्वरः ॥ ॥ ७॥
- जङ्घे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः ।
  चरणौ करुणासिंधुः सर्वाङ्गानि सदाशिवः ॥ ॥ ८॥
- एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् ।
  स भुक्त्वा सकलान्कामान् शिवसायुज्यमाप्नुयात्॥ ९॥
- ग्रहभूतपिशाचाद्यास्त्रैलोक्ये विचरन्ति ये ।
  दूरादाशु पलायन्ते शिवनामाभिरक्षणात् ॥ ॥ १०॥
- अभयङ्करनामेदं कवचं पार्वतीपतेः ।
  भक्त्या बिभर्ति यः कण्ठे तस्य वश्यं जगत्त्रयम् ॥ ११॥
- इमां नारायणः स्वप्ने शिवरक्षां यथाऽऽदिशत् ।
  प्रातरुत्थाय योगीन्द्रो याज्ञवल्क्यः तथाऽलिखत् ॥ १२॥

॥ इति श्री याज्ञवल्क्यप्रोक्तं शिवरक्षा स्तोत्रम् सम्पूर्णम् ॥

॥ द्वादश ज्योतिर्लिङ्ग स्तोत्रम् ॥

- सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकलावतंसम् ।
  भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥ ॥ १॥
- श्रीशैलशृङ्गे विबुधातिसङ्गे तुलाद्रितुङ्गेऽपि मुदा वसन्तम् ।
  तमर्जुनं मल्लिकपूर्वमेकं नमामि संसारसमुद्रसेतुम् ॥ ॥ २॥
- अवन्तिकायां विहितावतारं मुक्तिप्रदानाय च सज्जनानाम् ।
  अकालमृत्योः परिरक्षणार्थं वन्दे महाकालमहासुरेशम् ॥ ॥ ३॥
- कावेरिकानर्मदयोः पवित्रे समागमे सज्जनतारणाय ।
  सदैवमान्धातृपुरे वसन्तमोङ्कारमीशं शिवमेकमीडे ॥ ॥ ४॥
- पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसन्तं गिरिजासमेतम् ।
  सुरासुराराधितपादपद्मं श्रीवैद्यनाथं तमहं नमामि ॥ ॥ ५॥
- याम्ये सदङ्गे नगरेऽतिरम्ये विभूषिताङ्गं विविधैश्च भोगैः ।
  सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥ ॥ ६॥
- महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः ।
  सुरासुरैर्यक्ष महोरगाद्यैः केदारमीशं शिवमेकमीडे ॥ ॥ ७॥
- सह्याद्रिशीर्षे विमले वसन्तं गोदावरितीरपवित्रदेशे ।
  यद्दर्शनात्पातकमाशु नाशं प्रयाति तं त्र्यम्बकमीशमीडे ॥ ॥ ८॥
- सुताम्रपर्णीजलराशियोगे निबध्य सेतुं विशिखैरसंख्यैः ।
  श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ॥ ९॥
- यं डाकिनिशाकिनिकासमाजे निषेव्यमाणं पिशिताशनैश्च ।
  सदैव भीमादिपदप्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥ ॥ १०॥
- सानन्दमानन्दवने वसन्तमानन्दकन्दं हतपापवृन्दम् ।
  वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ॥ ११॥
- इलापुरे रम्यविशालकेऽस्मिन् समुल्लसन्तं च जगद्वरेण्यम् ।
  वन्दे महोदारतरस्वभावं घृष्णेश्वराख्यं शरणम् प्रपद्ये ॥ ॥ १२॥
- ज्योतिर्मयद्वादशलिङ्गकानां शिवात्मनां प्रोक्तमिदं क्रमेण ।
  स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं तदालोक्य निजं भजेच्च ॥ १३॥

॥ इति श्री शंकराचार्य विरचितं द्वादश ज्योतिर्लिङ्ग स्तोत्रम् सम्पूर्णम् ॥

॥ दारिद्रदहन शिव स्तोत्रम् ॥

जो व्यक्ति घोर आर्थिक संकट से जूझ रहे हों, कर्ज में डूबे हों, व्यापार व्यवसाय की पूंजी बार-बार फंस जाती हो उन्हें दारिद्रय दहन स्तोत्र से शिवजी की आराधना करनी चाहिए। महर्षि वशिष्ठ द्वारा रचित यह स्तोत्र बहुत असरदायक है।

यदि संकट बहुत ज्यादा है तो शिवमंदिर में या शिव की प्रतिमा के सामने संकल्प लेकर प्रतिदिन तीन बार इसका पाठ ब्राम्हण द्वार या स्वयं करें तो विशेष लाभ होगा। आर्थिक संकटों के साथ-साथ परिवार में सुख शांति के लिए भी इस मंत्र का जप बताया गया है।

- **विश्वेश्वराय नरकार्णवतारणाय, कर्णामृताय शशिशेखरधारणाय।**
  कर्पूरकांतिधवलाय जटाधराय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ १॥

- **गौरीप्रियाय रजनीशकलाधराय, कालान्तकाय भुजंगाधिपकङ्कणाय।**
  गङ्गाधराय गजराजविमर्दनाय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ २॥

- **भक्तिप्रियाय भवरोगभयापहाय, उग्राय दुर्गभवसागरतारणाय।**
  ज्योतिर्मयाय गुणनामसुनृत्यकाय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ३॥

- **चर्माम्बराय शवभस्मविलेपनाय, भालेक्षणाय मणिकुण्डलमण्डिताय।**
  मञ्जीरपादयुगलाय जटाधराय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ४॥

- **पञ्चाननाय फणिराजविभूषणाय, हेमांशुकाय भुवनत्रयमण्डिताय।**
  आनंतभूमिवरदाय तमोमयाय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ५॥

- **भानुप्रियाय भवसागरतारणाय, कालान्तकाय कमलासनपूजिताय।**
  नेत्रत्रयाय शुभलक्षणलक्षिताय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ६॥

- **रामप्रियाय रघुनाथवरप्रदाय, नागप्रियाय नरकार्णवतारणाय।**
  पुण्येषु पुण्यभरिताय सुरार्चिताय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ७॥

- **मुक्तेश्वराय फलदाय गणेश्वराय, गीतप्रियाय वृषभेश्वरवाहनाय।**
  मातङ्गचर्मवसनाय महेश्वराय, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ॥ ८॥

- **वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम्, सर्वसम्पत्करं शीघ्रं पुत्रपौत्रादिवर्धनम्।**
  त्रिसंध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात्, दारिद्रयदु:खदहनाय नमः शिवाय ॥ ९॥

॥ इति महर्षि वसिष्ठ विरचितं दारिद्र दहन शिव स्तोत्रम् सम्पूर्णम् ॥

॥ कालभैरवाष्टकम् स्तोत्रम् ॥

ॐ देवराजसेव्यमानपावनांघ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगंबरं
काशिकापुराधिनाथकालभैरवं भजे ॥१॥

भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमंबुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे ॥२॥

शूलटंकपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे ॥३॥

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ।
विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे ॥४॥

धर्मसेतुपालकं त्वधर्ममार्गनाशनं
कर्मपाशमोचकं सुशर्मधायकं विभुम् ।
स्वर्णवर्णशेषपाशशोभितांगमण्डलं
काशिकापुराधिनाथकालभैरवं भजे ॥५॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरंजनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं
काशिकापुराधिनाथकालभैरवं भजे ॥६॥

अट्टहासभिन्नपद्मजाण्डकोशसंततिं
दृष्टिपात्तनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथकालभैरवं भजे ॥७॥

भूतसंघनायकं विशालकीर्तिदायकं
काशिवासलोकपुण्यपापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथकालभैरवं भजे ॥८॥

फल श्रुति

कालभैरवाष्टकं पठंति ये मनोहरं
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं
ते प्रयान्ति कालभैरवांघ्रिसन्निधिं नरा ध्रुवम् ॥९॥

॥ इति श्री मच्छङ्कराचार्य विरचितं कालभैरवाष्टकम् स्तोत्रम् संपूर्णम् ॥

॥ पाशुपत स्तोत्रम् ॥

पाशुपत स्तोत्र का मात्र एक बार जप करने पर ही मनुष्य समस्त विघ्नों का नाश कर सकता है। सौ बार जप करने पर समस्त उत्पातो को नष्ट कर सकता है. तथा युद्ध आदि में विजय प्राप्त कर सकता है। इस मंत्र का घी और गुग्गल से हवन करने से मनुष्य असाध्य कार्यो को पूर्ण कर सकता है। इस पाशुपातास्त्र मंत्र के पाठ मात्र से समस्त क्लेशो की शांति हो जाती है।

स्तोत्रम .....

ॐ नमो भगवते महापाशुपतायातुलबलवीर्यपराक्रमाय त्रिपन्चनयनाय नानारुपाय नानाप्रहरणोद्यताय सर्वांगडरक्ताय भिन्नांजनचयप्रख्याय श्मशान वेतालप्रियाय सर्वविघ्ननिकृन्तन रताय सर्वसिध्दिप्रदाय भक्तानुकम्पिने असंख्यवक्त्रभुजपादाय तस्मिन् सिध्दाय वेतालवित्रासिने शाकिनीक्षोभ जनकाय व्याधिनिग्रहकारिणे पापभन्जनाय सूर्यसोमाग्नित्राय विष्णु कवचाय खडगवज्रहस्ताय यमदण्डवरुणपाशाय रूद्रशूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रहनिग्रहकारिणे दुष्टनागक्षय कारिणे।

ॐ कृष्णपिंग्डलाय फट। हूंकारास्त्राय फट। वज्र हस्ताय फट। शक्तये फट। दण्डाय फट। यमाय फट। खडगाय फट। नैऋताय फट। वरुणाय फट। वज्राय फट। पाशाय फट। ध्वजाय फट। अंकुशाय फट। गदायै फट। कुबेराय फट। त्रिशूलाय फट। मुदगराय फट। चक्राय फट। पद्माय फट। नागास्त्राय फट। ईशानाय फट। खेटकास्त्राय फट। मुण्डाय फट। मुण्डास्त्राय फट। काड्कालास्त्राय फट। पिच्छिकास्त्राय फट। क्षुरिकास्त्राय फट। ब्रह्मास्त्राय फट। शक्त्यस्त्राय फट। गणास्त्राय फट। सिध्दास्त्राय फट। पिलिपिच्छास्त्राय फट। गंधर्वास्त्राय फट। पूर्वास्त्रायै फट। दक्षिणास्त्राय फट। वामास्त्राय फट। पश्चिमास्त्राय फट। मंत्रास्त्राय फट। शाकिन्यास्त्राय फट। योगिन्यस्त्राय फट। दण्डास्त्राय फट। महादण्डास्त्राय फट। नमोअस्त्राय फट। शिवास्त्राय फट। ईशानास्त्राय फट। पुरुषास्त्राय फट। अघोरास्त्राय फट। सद्योजातास्त्राय फट। हृदयास्त्राय फट। महास्त्राय फट। गरुडास्त्राय फट। राक्षसास्त्राय फट। दानवास्त्राय फट। क्षौ नरसिन्हास्त्राय फट। त्वष्ट्रास्त्राय फट। सर्वास्त्राय फट। नः फट। वः फट। पः फट। फः फट। मः फट। श्रीः फट। पेः फट। भूः फट। भुवः फट। स्वः फट। महः फट। जनः फट। तपः फट। सत्यं फट। सर्वलोक फट। सर्वपाताल फट। सर्वतत्व फट। सर्वप्राण फट। सर्वनाड़ी फट। सर्वकारण फट। सर्वदेव फट। ह्रीं फट। श्रीं फट। ड्रूं फट। स्त्रुं फट। स्वां फट। लां फट। वैराग्याय फट। मायास्त्राय फट। कामास्त्राय फट। क्षेत्रपालास्त्राय फट। हुंकारास्त्राय फट। भास्करास्त्राय फट। चंद्रास्त्राय फट। विघ्नेश्वरास्त्राय फट। गौः गां फट। स्त्रों स्त्रौं फट। हौं हों फट। भ्रामय भ्रामय फट। संतापय संतापय फट। छादय छादय फट। उन्मूलय उन्मूलय फट। त्रासय त्रासय फट। संजीवय संजीवय फट। विद्रावय विद्रावय फट। सर्वदुरितं नाशय नाशय फट।

॥ नीलकंठ स्तोत्रम् ॥

विनियोग - ॐ अस्य श्री भगवान नीलकंठ सदा-शिव-स्तोत्र मंत्रस्य श्री ब्रह्मा ऋषिः, अनुष्टुप छन्दः, श्री नीलकंठ सदाशिवो देवता, ब्रह्म बीजं, पार्वती शक्तिः, मम समस्त पाप क्षयार्थं क्षेम-स्थै-आर्यु आरोग्य - अभिवृद्धयर्थं मोक्षादि चतुर्वर्ग-साधनार्थं च श्री नीलकंठ-सदाशिव-प्रसाद-सिद्धयर्थे जपे विनियोगः ।

ऋष्यादि-न्यास- श्री ब्रह्मा ऋषये नमः शिरसि । अनुष्टुप छन्दसेनमः मुखे । श्री नीलकंठ सदाशिव देवतायै नमः हृदि । ब्रह्म बीजाय नमः लिंगे । पार्वती शक्त्यैनमः नाभौ । मम समस्त पाप क्षयार्थंक्षेम-स्थै-आर्यु-आरोग्य-अभिवृद्धयर्थं मोक्षादि-चतुर्वर्ग-साधनार्थंच श्री नीलकंठ सदाशिव प्रसाद सिद्धयर्थे जविनियोगाय नमः सर्वांगे ।

स्तोत्रम् - **ॐ नमो नीलकंठाय, श्वेत-शरीराय, सर्पा लंकार भूषिताय, भुजंग परिकराय, नागयज्ञो पवीताय, अनेक मृत्यु विनाशाय नमः । युग युगांत काल प्रलय-प्रचंडाय, प्र ज्वाल-मुखाय नमः । दंष्ट्राकराल घोर रूपाय हूं हूं फट् स्वाहा । ज्वालामुखाय, मंत्र करालाय, प्रचंडार्क सहस्त्रांशु चंडाय नमः । कर्पूर मोद परिमलांगाय नमः ।**

ॐ इंद्र नील महानील वज्र वैलक्ष्य मणि माणिक्य मुकुट भूषणाय हन हन हन दहन दहनाय ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घातय घातय हूं फट् जरा मरण भय हूं हूं फट् स्वाहा । आत्म मंत्र संरक्षणाय नमः ।

ॐ ह्रां ह्रीं ह्रीं स्फुर अघोर रूपाय रथ रथ तंत्र तंत्र चट् चट् कह कह मद मद दहन दाहनाय ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घातय घातय हूं फट् जरा मरण भय हूं हूं फट् स्वाहा ।

अनंताघोर ज्वर मरण भय क्षय कुष्ठ व्याधि विनाशाय, शाकिनी डाकिनी ब्रह्मराक्षस दैत्य दानव बंधनाय, अपस्मार भूत बैताल डाकिनी शाकिनी सर्व ग्रह विनाशाय, मंत्र कोटि प्रकटाय पर विद्योच्छेदनाय, हूं हूं फट् स्वाहा। आत्म मंत्र सरंक्षणाय नमः।

ॐ ह्रां ह्रीं ह्रौं नमो भूत डामरी ज्वालवश भूतानां द्वादश भू तानांत्रयो दश षोडश प्रेतानां पंच दश डाकिनी शाकिनीनां हन हन। दहन दारनाथ! एकाहिक द्वयाहिक त्र्याहिक चातुर्थिक पंचाहिक व्याघ्य पादांत वातादि वात सरिक कफ पित्तक काश श्वास श्लेष्मादिकं दह दह छिन्धि छिन्धि श्रीमहादेव निर्मित स्तंभन मोहन वश्याकर्षणोच्चाटन कीलना द्वेषण इति षट् कर्माणि वृत्य हूं हूं फट् स्वाहा ।

वात-ज्वर मरण-भय छिन्न छिन्न नेह नेह भूतज्वर प्रेतज्वर पिशाचज्वर रात्रिज्वर शीतज्वर तापज्वर बालज्वर कुमारज्वर अमितज्वर दहनज्वर ब्रह्मज्वर विष्णुज्वर रूद्रज्वर मारीज्वर प्रवेशज्वर कामादि विषमज्वर मारी ज्वर प्रचण्ड घराय प्रमथेश्वर! शीघ्रं हूं हूं फट् स्वाहा ।

॥ ॐ नमो नीलकंठाय, दक्षज्वर ध्वंसनाय श्री नीलकंठाय नमः ॥

॥ इति श्री नीलकंठ स्तोत्रम संपूर्णः ॥

॥ शिव ताण्डव स्तोत्रम् ॥

जटा टवी गलज्जल प्रवाह पावितस्थले ,
गलेऽवलम्ब्य लम्बितां भुजङ्ग तुङ्ग मालिकाम् ।
डमड् डमड् डमड् डमन्निनाद वड्डमर्वयं ,
चकार चण्ड ताण्डवं तनोतु नः शिवः शिवम् ॥ १॥

जटा कटाह संभ्रम भ्रमन् निलिम्प निर्झरी ,
विलो लवी चिवल्लरी विराजमान मूर्धनि ।
धगद् धगद् धगज् जलल् ललाट पट्ट पावके ,
किशोर चन्द्र शेखरे रतिः प्रतिक्षणं मम ॥ २॥

धरा धरेन्द्र नंदिनी विलास बन्धु बन्धुरस् ,
फुरद् दिगन्त सन्तति प्रमोद मानमानसे ।
कृपा कटाक्ष धोरणी निरुद्ध दुर्धरापदि ,
क्वचिद् दिगम्बरे मनो विनोदमेतु वस्तुनि ॥ ३॥

जटा भुजङ्ग पिङ्गलस् फुरत्फणा मणिप्रभा ,
कदम्ब कुङ्कुमद्रवप् रलिप्तदिग्व धूमुखे ।
मदान्ध सिन्धु रस्फुरत् त्वगुत्तरीय मेदुरे ,
मनो विनोद मद्भुतं बिभर्तु भूतभर्तरि ॥ ४॥

सहस्र लोचनप्रभृत्य शेष लेखशेखर ,
प्रसून धूलिधोरणी विधूस राङ्घ्रि पीठभूः ।
भुजङ्ग राजमालया निबद्ध जाटजूटकः ,
श्रियै चिराय जायतां चकोर बन्धुशेखरः ॥५॥

ललाट चत्वरज्वलद् धनञ्जयस्फुलिङ्गभा ,
निपीत पञ्चसायकं नमन् निलिम्प नायकम् ।
सुधा मयूख लेखया विराजमान शेखरं ,
महाकपालि सम्पदे शिरो जटालमस्तु नः ॥ ६॥

कराल भाल पट्टिका धगद् धगद् धगज्ज्वल ,
द्धनञ्जयाहुती कृतप्रचण्ड पञ्चसायके ।
धरा धरेन्द्र नन्दिनी कुचाग्र चित्रपत्रक ,
प्रकल्प नैक शिल्पिनि त्रिलोचने रतिर्मम ॥ ७॥

नवीन मेघ मण्डली निरुद्ध दुर्धरस्फुरत्- ,
कुहू निशीथि नीतमः प्रबन्ध बद्ध कन्धरः ।
निलिम्प निर्झरी धरस् तनोतु कृत्ति सिन्धुरः ,
कला निधान बन्धुरः श्रियं जगद् धुरंधरः ॥ ८॥

प्रफुल्ल नील पङ्कज प्रपञ्च कालि मप्रभा- ,
वलम्बि कण्ठ कन्दली रुचिप्रबद्ध कन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं ,
गजच्छि दांध कच्छिदं तमंत कच्छिदं भजे ॥ ९॥

अखर्व सर्व मङ्गला कला कदंब मञ्जरी- ,
रस प्रवाह माधुरी विजृंभणा मधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं ,
गजान्त कान्ध कान्तकं तमन्त कान्तकं भजे ॥ १०॥

जयत् वदभ्र विभ्रम भ्रमद् भुजङ्ग मश्वस–,
द्विनिर्ग मत् क्रमस्फुरत् कराल भाल हव्यवाट् ।
धिमिद् धिमिद् धिमिध्वनन् मृदङ्ग तुङ्ग मङ्गल- ,
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः ॥ ११॥

दृषद्विचित्र तल्पयोर् भुजङ्गमौक्ति कस्रजोर्- ,
गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः,
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥ १२॥

कदा निलिम्प निर्झरी निकुञ्ज कोटरे वसन्,
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन् ।
विलोललोललोचनो ललामभाललग्नकः,
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १३॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं ,
पठन् स्मरन् ब्रुवन्नरो विशुद्धिमेति संततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं ,
विमोहनं हि देहिनां सुशङ्करस्य चिंतनम् ॥ १४॥

पूजा वसान समये दशवक्त्र गीतं ,
यः शंभु पूजन परं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्र तुरङ्ग युक्तां ,
लक्ष्मीं सदैव सुमुखिं प्रददाति शंभुः ॥ १५॥

॥ इति श्रीरावणकृतम् शिवताण्डव स्तोत्रम् सम्पूर्णम् ॥

॥ दक्षिणामूर्ति स्तोत्रम् - १ ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्,
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यदा निद्रया।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयम्,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥१॥

बीजस्यान्तरिवान्कुरो जगदिदं प्राङ्निर्विकल्पं,
पुनर्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम्।
मायावीव विजृम्भयत्यपि महायोगोव यः स्वेच्छया,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥२॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते,
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥३॥

नानाछिद्रघटोदरस्तिथमहादीपप्रभाभास्वरं,
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते।
जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत्,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥४॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः,
स्त्रीबालांधजड़ोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥५॥

राहुग्रस्तदिवाकरेंदुसदृशो मायासमाच्छादनात्,
संमात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥६॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि,
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥७॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः,
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः,
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥८॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्,
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोस्तस्मै,
श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥९॥

सर्वात्मत्वमिति स्फुटिकृतमिदं यस्मादमुष्मिन् स्तवे,
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः,
सिद्ध्येत्तत्पुनरष्टधा परिणतम् चैश्वर्यमव्याहतम् ॥१०॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ॥११॥

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥१२॥

॥ इति श्री शंकराचार्य विरचितं दक्षिणामूर्ति स्तोत्रम् सम्पूर्णम् ॥

॥ श्री दक्षिणामूर्ति स्तोत्रम् - २ ॥

- उपासकानां यदुपासनीयमुपात्तवासं वटशाखिमूले ।
  तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्तु चित्ते मम बोधरूपम् ॥ १॥

- अद्राक्षमक्षीणदयानिधानमाचार्यमाद्यं वटमूलभागे ।
  मौनेन मन्दस्मितभूषितेन महर्षिलोकस्य तमो नुदन्तम् ॥ ॥ २॥

- विद्राविताशेषतमोगणेन मुद्राविशेषेण मुहुर्मुनीनाम् ।
  निरस्य मायां दयया विधत्ते देवो महांस्तत्त्वमसीति बोधम् ॥ ३॥

- अपारकारुण्यसुधातरङ्गैरपाङ्गपातैरवलोकयन्तम् ।
  कठोरसंसारनिदाघतप्तान्मुनीनहं नौमि गुरुं गुरूणाम् ॥ ॥ ४॥

- ममाद्यदेवो वटमूलवासी कृपाविशेषात्कृतसन्निधानः ।
  ओंकाररूपामुपदिश्य विद्यामाविद्यकध्वान्तमपाकरोतु ॥ ॥ ५॥

- कलाभिरिन्दोरिव कल्पिताङ्गं मुक्ताकलापैरिव बद्धमूर्तिम् ।
  आलोकये देशिकमप्रमेयमनाद्यविद्यातिमिरप्रभातम् ॥ ॥ ६॥

- स्वदक्षजानुस्थितवामपादं पादोदरालंकृतयोगपट्टम् ।
  अपस्मृतेराहितपादमङ्गे प्रणौमि देवं प्रणिधानवन्तम् ॥ ॥ ७॥

- तत्त्वार्थमन्तेवसतामृषीणां युवाऽपि यः सन्नुपदेष्टुमीष्टे ।
  प्रणौमि तं प्राक्तनपुण्यजालैराचार्यमाश्चर्यगुणाधिवासम् ॥ ॥ ८॥

- एकेन मुद्रां परशुं करेण करेण चान्येन मृगं दधानः ।
  स्वजानुविन्यस्तकरः पुरस्तादाचार्यचूडामणिराविरस्तु ॥ ॥ ९॥

- आलेपवन्तं मदनाङ्गभूत्या शार्दूलकृत्त्या परिधानवन्तम् ।
  आलोकये कञ्चन देशिकेन्द्रमज्ञानवाराकरवाडवाग्निम् ॥ ॥ १०॥

- चारुस्मितं सोमकलावतंसं वीणाधरं व्यक्तजटाकलापम् ।
  उपासते केचन योगिनस्त्वामुपात्तनादानुभवप्रमोदम् ॥ ॥ ११॥

- उपासते यं मुनय: शुकाद्या निराशिषो निर्ममताधिवासा: ।
  तं दक्षिणामूर्तितनुं महेशमुपास्महे मोहमहार्तिशान्त्यै ॥ ॥ १२॥

- कान्त्या निन्दितकुन्दकन्दलवपुर्न्यग्रोधमूले वस –
  न्कारुण्यामृतवारिभिर्मुनिजनं संभावयन्वीक्षितै: ।
  मोहध्वान्तविभेदनं विरचयन्बोधेन तत्तादृशा
  देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिना ॥ ॥ १३॥

- अगौरगात्रैरललाटनेत्रैरशान्तवेषैरभुजङ्गभूषै: ।
  अबोधमुद्रैरनपास्तनिद्रैरपूर्णकामैरमरैरलं न: ॥ ॥ १४॥

- दैवतानि कति सन्ति चावनौ नैव तानि मनसो मतानि मे ।
  दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव दैवतम् ॥ ॥ १५॥

- मुदिताय मुग्धशशिनावतंसिने भसितावलेपरमणीयमूर्तये ।
  जगदीन्द्रजालरचनापटीयसे महसे नमोऽस्तु वटमूलवासिने ॥ १६॥

- व्यालम्बिनीभि: परितो जटाभि: कलावशेषेण कलाधरेण ।
  पश्यँल्ललाटेन मुखेन्दुना च प्रकाशसे चेतसि निर्मलानाम् ॥ १७॥

- उपासकानां त्वमुमासहाय: पूर्णेन्दुभावं प्रकटीकरोषि ।
  यदद्य ते दर्शनमात्रतो मे द्रवत्यहो मानसचन्द्रकान्त: ॥ ॥ १८॥

- यस्ते प्रसन्नामनुसन्दधानो मूर्तिं मुदा मुग्धशशाङ्कमौले: ।
  ऐश्वर्यमायुर्लभते च विद्यामन्ते च वेदान्तमहारहस्यम् ॥ ॥ १९॥

॥ इति श्री मत् शंकराचार्य विरचितं दक्षिणामूर्ति स्तोत्रम् सम्पूर्णम् ॥

॥ शम्भु नटनम् (नटराज) स्तोत्रम् (पतंजलि कृत) ॥

- सदञ्चितं मुदञ्चित-निकुञ्चितपदं झलझलञ्चलित-मञ्जुकटकं
  पतञ्जलि-दृगञ्जनमनञ्जनमचञ्चलपदं जनन-भञ्जनकरम्।
  कदम्बरुचिमम्बरवसं परममम्बुद-कदम्बक-विडम्बक-गलं
  चिदम्बुदमणिं बुध-हृदम्बुज-रविं पर-चिदम्बर-नटं हृदि भज ॥ ॥ १॥

- हरं त्रिपुर-भञ्जनमनन्त-कृतकङ्कणमखण्डदयमन्त-रहितं
  विरिञ्चि-सुरसंहति-पुरन्दर-विचिन्तित-पदं तरुण-चन्द्र-मकुटम्।
  परं पद-विखण्डित-यमं भसित-मण्डित-तनुं मदन-वञ्चन-परं
  चिरन्तनममुं प्रणत-सञ्चित-निधिं परचिदम्बर-नटं हृदि भज ॥ ॥ २॥

- अवन्तमखिलं जगदभङ्गगुणतुङ्गममतं धृत-विधुं सुरसरित्-
  तरङ्ग-निकुरुम्ब-धृति-लम्पट-जटं शमन-डम्बर-हरं भव-हरम्।
  शिवं दश-दिगन्तर-विजृम्भित-करं कर-लसन्-मृगशिशुं पशुपतिं
  हरं शशि-धनञ्जय-पतङ्ग-नयनं पर-चिदम्बर-नटं हृदि भज ॥ ॥ ३॥

- अनन्त-नवरत्न-विलसत्कटक-किङ्किणि-झलंझल-झलञ्झलरवं
  मुकुन्द-विधि-हस्तगत-मद्दल-लय-ध्वनि-धिमिद्धिमित-नर्तन-पदम्।
  शकुन्तरथ-बर्हिरथ(वह्निरथ)-नन्दिमुख-दन्तिमुख-भृङ्गि-रिटि-सङ्घ-निकटं
  सनन्द-सनक-प्रमुख-वन्दित-पदं पर-चिदम्बर-नटं हृदि भज ॥ ॥४॥

- अनन्त-महिमं त्रिदश-वन्द्य-चरणं मुनि-हृदन्तर-वसन्तममलं
  कबन्ध-वियदिन्द्ववनि-गन्धवह-वह्नि-मखबन्धु-रवि-मञ्जु-वपुषम्।
  अनन्त-विभवं त्रिजगदन्तरमणिं त्रिणयनं त्रिपुर-खण्डन-परं
  सनन्द-मुनि-वन्दित-पदं सकरुणं पर-चिदम्बर-नटं हृदि भज ॥ ॥५॥

- अचिन्त्यमलिबृन्द-रुचिबन्धुर-गल-स्फुरित-कुन्द-निकुरुम्ब-धवलं
  मुकुन्द-सुरबृन्द-बलहन्तृ-कृत-वन्दन-लसन्तमहिकुण्डल-धरम्।
  अकम्पमनुकम्पित-रतिं सुजन-मङ्गल-निधिं गजहरं पशुपतिं
  धनञ्जय-नुतं प्रणत-रञ्जन-परं पर-चिदम्बर-नटं हृदि भज ॥ ॥६॥

- परं सुरवरं पुरहरं पशुपतिं जनित-दन्तिमुख-षण्मुखममुं
मृडं कनक-पिङ्गल-जटं सनक-पङ्कज-रविं सुमनसं हिम-रुचिम् ।
असङ्ग-मनसं जलधि-जन्म-गरलं कबलयन्तमतुलं गुणनिधिं
सनन्दवरदं शमितमिन्दुवदनं पर-चिदम्बर-नटं हृदि भज ॥ ॥७॥

- अजं क्षितिरथं भुजगपुङ्गव-गुणं कनक-शृङ्गि-धनुषं करलसत्
कुरङ्क-पृथु-टङ्क-परशुं रुचिर-कुङ्कुम-रुचिं डमरुकं च दधतम्।
मुकुन्द-विशिखं नमदवन्ध्य-फलदं निगम-बृन्द-तुरगं निरुपमं
स चण्डिकममुं झटिति-संहृत-पुरं पर-चिदम्बर-नटं हृदि भज ॥ ॥८॥

- अनङ्ग-परिपन्थिनमजं क्षिति-धुरंधरमलं करुणयन्तमखिलं
ज्वलन्तमनलं दधतमन्तकरिपुं सततमिन्द्रसुर-वन्दित-पदम्।
उदञ्चदरविन्द-कुल-बन्धु-शतबिम्ब-रुचि-संहति-सुगन्धि-वपुषं
पतञ्जलि-नुतं प्रणव-पञ्जर-शुकं पर-चिदम्बर-नटं हृदि भज ॥ ॥९॥

- इति स्तवममुं भुजग-पुङ्गव-कृतं प्रतिदिनं पठति यः कृतमुखः
सदः प्रभु-पदद्वितय-दर्शनपदं सुललितं चरण-शृङ्ग-रहितम्।
स्मरः प्रभव-संभव-हरित्पति-हरि-प्रमुख दिव्य-नुत-शङ्करपदं
स गच्छति परं न तु जनुर्जलनिधिं परम-दुःख-जनकं दुरितदम् ॥ ॥१०॥

॥ इति शम्भु नटकम् स्तोत्रम् सम्पूर्णम् ॥

॥ मृत्युंजय स्तोत्रम् - १ ॥

विनियोग - ॐ अस्य श्रीसदाशिवस्तोत्रमन्त्रस्य मार्कण्डेय ऋषिः । अनुष्टुप् छन्दः । श्रीसदाशिवो देवता । गौरी शक्तिः । मम समस्तमृत्युशान्त्यर्थे जपे विनियोगः।

रत्नसानुशरासनं रजताद्रिश्रृंगनिकेतनं,
शिण्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदशालयैरभिवन्दितं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥१॥

पंचपादपपुष्पगन्धिपदाम्बुजव्दयशोभितं,
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेवरं भवनाशिनं भवमव्ययं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥२॥

मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं,
पंकजनासनपद्मलोचनपूजिताङ् घ्रिसरोरुहम् ।
देवसिद्धतरंगिणीकरसिक्तशीतजटाधरं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥३॥

कुण्डलीकृतकुण्डलीश्वरककुण्डलं वृषवाहनं,
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्तकमाश्रितामरपादपं शमनान्तकं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥४॥

यक्षराजसखं भगक्षिहरं भुजंगविभूषणं,
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥५॥

भेषजं भवरोगिणामखिलापदामपहारिणं,
दक्षयज्ञविनाशिनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्तिफलप्रदं निखिलाघसंघनिबर्हणं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥६॥

भक्तवत्सलमर्चतां निधिमक्षयं हरिदम्बरं,
सर्वभूतपतिं परात्परमप्रमेयमनूपमम् ।
भूमिवारिनभोहुताशनसोमपालितस्वाकृतिं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥७॥

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं,
संहरन्तमथ प्रपंचमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं,
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥८॥

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥९॥

कालकण्ठं कलामूर्तिं कालाग्निं कालनाशनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१०॥

नीलकण्ठं विरुपाक्षं निर्मलं निरुपद्रवम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥११॥

वामदेवं महादेवं लोकनाथं जगद्गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१२॥

देवदेवं जगन्नाथं देवेशमृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१३॥

अनन्तमव्ययं शान्तमक्षमालाधारं हरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१४॥

आनन्दं परमं नित्यं कैवल्यपदकारणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१५॥

स्वर्गापवर्गदातारं सृष्टिस्थित्यन्तकारिणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१६॥

॥ इति श्री पद्म महापुराणान्तर्गत उत्तरखण्डे श्री मृत्युंजय स्तोत्रम् सम्पूर्णम् ॥

॥ मृत्युंजय स्तोत्रम् - २ ॥

विनियोग - ॐ अस्य श्री महा मृत्युंजय स्तोत्र मंत्रस्य । श्री मार्कंडेय ऋषिः । अनुष्टुप् छंदः । श्री मृत्युंजयो देवता । गौरीशक्तिः । मम सर्वारिष्ट समस्त मृत्युशांत्यर्थं सकलैश्वर्य प्राप्त्यर्थं जपे विनियोगः

ध्यानम्

चंद्रर्काग्निविलोचनं स्मितमुखं पद्मद्वयांतः स्थितम्', मुद्रापाश मृगाक्ष सत्रविलसत् पाणिं हिमांशुं प्रभुम् ।
कोटींदु प्रहरत् सुधाप्लुत तनुं हारादिभोषोज्वलं, कांतं विश्वविमोहनं पशुपतिं मृत्युंजयं भावयेत् ॥

ॐ रुद्रं पशुपतिं स्थाणुं नीलकंठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१॥

नीलकंठं कालमूर्तिं कालज्ञं कालनाशनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥२॥

नीलकंठं विरूपाक्षं निर्मलं निलयप्रदम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥३॥

वामदेवं महादेवं लोकनाथं जगद्गुरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥४॥

देवदेवं जगन्नाथं देवेशं वृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥५॥

गंगाधरं महादेवं सर्पाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥६॥

त्र्यक्षं चतुर्भुजं शांतं जटामुकुटधारणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥७॥

भस्मोद्धूलितसर्वांगं नागाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८॥

अनंतमव्ययं शांतं अक्षमालाधरं हरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥९॥

आनंदं परमं नित्यं कैवल्यपददायिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१०॥

अर्धनारीश्वरं देवं पार्वतीप्राणनायकम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥११॥

प्रलयस्थितिकर्तारं आदिकर्तारमीश्वरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१२॥

व्योमकेशं विरूपाक्षं चंद्रार्द्ध कृतशेखरम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१३॥

गंगाधरं शशिधरं शंकरं शूलपाणिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१४॥

अनाथं परमानंदं कैवल्यपददायिनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१५॥

स्वर्गापवर्ग दातारं सृष्टिस्थित्यांतकारिणम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१६॥

कल्पायुर्देहि मे पुण्यं यावदायुररोगताम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१७॥

शिवेशानां महादेवं वामदेवं सदाशिवम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१८॥

उत्पत्ति स्थितिसंहार कर्तारमीश्वरं गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१९॥

फलश्रुति

मार्कंडेय कृतं स्तोत्रं यः पठेत् शिवसन्निधौ ।
तस्य मृत्युभयं नास्ति न अग्निचोरभयं क्वचित्॥२०॥

शतावृतं प्रकर्तव्यं संकटे कष्टनाशनम् ।
शुचिर्भूत्वा पठेत् स्तोत्रं सर्वसिद्धिप्रदायकम् ॥२१॥

मृत्युंजय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्यु जरारोगैः पीडितं कर्मबंधनैः ॥२२॥

तावकस्त्वद्गतप्राणस्त्व च्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं त्र्यंबकाख्यममं जपेत् ॥२३॥

नमः शिवाय सांबाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥२४॥

॥ इती श्री मार्कंडेयपुराणे महा मृत्युंजय स्तोत्रं संपूर्णम् ॥

॥ शिव महिम्नः स्तोत्रम् ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो –
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परममृतं निर्मितवत –
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किंकाय स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्तो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता –
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृधिं दधति च भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवंजिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद् यदुपरि विरिंचो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद् बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती –
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो –
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा –
विधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः ॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखा: ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मर: स्मर्तव्यात्मा नहि वशिषु पथ्य: परिभव: ॥१५॥

मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौ:स्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचि:
प्रवाहो वारां य: पृषतलघुदृष्ट: शिरसि ते ।
जगद् द्वीपाकारं जलधिवलयं तेन कृतमि –
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपु: ॥१७॥

रथ: क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथांगे चन्द्रार्कौ रथचरणपाणि: शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि –
र्विधेयै: क्रीडन्त्यो न खलु परतन्त्रा: प्रभुधिय:॥१८॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो –
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेक: परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकर: कर्मसु जन: ॥२०॥

क्रियादक्षो दक्ष: क्रतुपतिरधीशस्तनुभृता –
मृषीणामार्त्विज्यं शरणद सदस्या: सुरगणा: ।
क्रतुभ्रेषस्त्वत्त: क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तु: श्रद्धाविधुरमभिचाराय हि मखा: ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभस: ॥२२॥

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुर: प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना –
ददैति त्वामद्धा बत वरद मुग्धा युवतय: ॥२३॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचा: सहचरा –
श्चिताभस्मलेप: स्रगपि नृकरोटीपरिकर: ।
अमंगलल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मंगलमसि॥२४॥

मन: प्रत्यक्चित्ते सविधमवधायात्तमरुत:
प्रहृष्यद्रोमाण: प्रमदसलिलोत्संगितदृश: ।
यदालोक्याह्लादं हृद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२५॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह –
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा –
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभि:
समस्तं व्यस्तं त्वं शरणद गृणात्योमिति पदम्॥२७॥

भव: शर्वो रुद्र: पशुपतिरथोग्र: सहमहां –
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते ॥२८॥

नमा नादष्ठाय प्रियदव दविष्ठाय च नमो
नम: क्षोदिष्ठाय स्मरहर महिष्ठाय च नम: ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नम: सर्वस्मै ते तदिदमिति शर्वाय च नम: ॥२९॥

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नम:
प्रबलतमसे तत्संहारे हराय नमो नम: ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नम:
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नम: ॥३०॥

कृशपरिणति चेत: क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धि: ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवर शाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले –
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगणवरिष्ठ: पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तै: स्तोत्रमेतच्चकार ॥३३॥

अहरहरनवद्यं धूर्जटे: स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्त: पुमान् य: ।
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायु: पुत्रवान् कीर्तिमांश्च ॥३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुति: ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरो: परम् ॥३५॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिका: क्रिया: ।
महिम्न: स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६॥

कुसुमदशननामा सर्वगन्धर्वराज:
शिशुशशिधरमौलेर्देवदेवस्य दास: ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्न: ॥३७॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्य: प्रांजलिर्नान्यचेता: ।
व्रजति शिवसमीपं किन्नरै: स्तूयमान:
स्तवनमिदममोघं पुष्पदन्तप्रणितम् ॥३८॥

आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥३९॥

इत्येषा वाड्मयी पूजा श्रीमच्छंकरपादयो: ।
अर्पिता तेन देवेश: प्रीयतां मे सदाशिव: ॥४०॥

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नम: ॥४१॥

एककालं द्विकालं वा त्रिकालं य: पठेन्नर: ।
सर्वपापविनिर्मुक्त: शिवलोके महीयते ॥४२॥

श्री पुष्पदन्त मुख पंकज निर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेश:॥४३॥

॥ इति गन्धर्वराज पुष्पदन्त कृतं शिवमहिम्न: स्तोत्रं सम्पूर्णम् ॥

॥ शिवापराध क्षमापन स्तोत्रम् ॥

- आदौ कर्मप्रसंगात् कलयति कलुषं मातृकुक्षौ स्थितं मां
  विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः ।
  यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ १॥

- बाल्ये दुःखातिरेकान्मललुलितवपुः स्तन्यपाने पिपासा
  नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति ।
  नानारोगादिदुःखादुदन परवशः शंकरं न स्मरामि
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ २॥

- प्रौढोऽहं यौवनस्थो विषयविषधरैः पंचभिर्मर्मसन्धौ
  दष्टो नष्टोऽविवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः ।
  शैवी चिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ३॥

- वार्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादि तापैः
  पापैरोगैर्वियोगै-स्त्वनव सितवपुः प्रौढिहीनं च दीनम् ।
  मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ४॥

- नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
  श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे ।
  ज्ञातो*धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ५॥

- स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं
  पूजार्थं वा कदाचिद्बहु-तरगहनात्खण्डबिल्वीदलानि ।
  नानीता पद्ममाला सरसि विकसिता गन्धपुष्पैस्त्वदर्थं
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ६॥

- दुग्धैर्मध्वाज्य युक्तैर्दधिसितसहितैः स्नापितं नैव लिंगं
  नो लिप्तं चन्दनाद्यैः कनक विरचितैः पूजितं न प्रसूनैः ।
  धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ७॥

- ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
  हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः ।
  नो तप्तं गांगतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ८॥

- स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे
  शान्ते स्वान्ते प्रलीने प्रकटितबिभवे ज्योतिरूपेऽपराख्ये ।
  लिंगज्ञे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ ९॥

- नग्नो निःसंगशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
  नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
  उन्मन्याऽवस्थया त्वां विगतकलिमलं शंकरं न स्मरामि
  क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥ १०॥

- चन्द्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे
  सर्पैर्भूषित कण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।
  दन्तित्वक्कृतसुन्दरांबरधरे त्रैलोक्यसारे हरे
  मोक्षार्थं कुरु चितवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ ॥ ११॥

- किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
  किं वा पुत्रकळत्र-मित्रपशुभिर्देहेन गेहेन किम्
  ज्ञात्वैतत्क्षणभङ्गुरं सपदिरे त्याज्यं मनो दूरतः
  स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ ॥ १२॥

- आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
  प्रात्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः
  लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं
  तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ ॥ १३॥

- करचरणकृतं वाक्कायजं कर्मजं वा
  श्रवणनयनजं वा मानसं वाऽपराधम् ।
  विहितमविहितं वा सर्वमेतत्क्षमस्व
  जय जय करुणाब्धे श्रीमहादेव शंभो ॥ ॥ १४॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं शिवापराधक्षमापनस्तोत्रं संपूर्णम् ॥

॥ उमा महेश्वर स्तोत्रम् ॥

नम: शिवाभ्यां नवयौवनाभ्यां
परस्पराश्लिष्टवपुर्धराभ्यां ।
नगेन्द्रकन्यावृषकेतनाभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ १॥

नम: शिवाभ्यां सरसोत्सवाभ्यां
नमस्कृताभीष्टवरप्रदाभ्यां ।
नारायेणाऽर्चितपादुकाभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ २॥

नम: शिवाभ्यां वृषवाहनभ्यां
विरञ्चिविष्णिवन्द्रवन्द्रसुपूजिताभ्यां ।
विभूतिपाटीरविलेपनाभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ३॥

नम: शिवाभ्यां जगदीश्वराभ्यां
जगत्पतिभ्यां जयविग्रहाभ्यां ।
जम्भारिमुख्यैरभिवन्दिताभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ४॥

नम: शिवाभ्यां परमौषधाभ्यां
पञ्चाक्षरीपञ्जररञ्जिताभ्याम् ।
प्रपंचसृष्टिस्थितिसंह्रतिभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ५॥

नम: शिवाभ्यामतिसुंदराभ्यां-
मत्यन्तमासक्तहृदम्बुजाभ्यां ।
अशेषलोकैकहितङ्कराभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ६॥

नम: शिवाभ्यां कलिनाशानाभ्यां
कङ्कालकल्याणवपुर्धराभ्यां ।
कैलासशैलस्थितदेवताभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ७॥

नम: शिवाभ्यामशुभापहाभ्या-
मशेषलोकैकविशेषिताभ्याम ।
अकुण्ठिताभ्यां स्मृतिसंभृताभ्यां
नमो नम: शंकरपार्वतीभ्यां ॥ ८॥

नम: शिवाभ्यां रथवाहनाभ्यां
रविन्दुवैश्वानरलोचनाभ्याम ।
राकाशशाङ्काभमुखाम्बुजाभ्यां
नमो नम: शंकरपार्वतीभ्याम ॥ ९॥

नम: शिवाभ्यां जटिलन्धराभ्यां
ज़रामृतिभ्यां च विवर्जिताभ्याम ।
जनार्दनाब्जोद्भवपूजिताभ्यां
नमो नम: शंकरपार्वतीभ्याम ॥ १०॥

नम: शिवाभ्यां विषमेक्षणाभ्यां
बिल्वच्छदामल्लिकदामभृदभ्याम ।
शोभावतीशान्तवतीश्वराभ्यां
नमो नम: शंकरपार्वतीभ्याम ॥ ११॥

नम: शिवाभ्यां पशुपालकाभ्यां
जगद्त्रयीरक्षणबद्धहृद्भ्याम ।
समस्तदेवासुरपूजिताभ्यां
नमो नम: शंकरपार्वतीभ्याम ॥ १२॥

स्तोत्रं त्रिसंध्यं शिवपार्वतीयं
भक्त्या पठेद द्वादशकं नरो य: ।
स सर्वसौभाग्यफलानि भुङ्क्ते
शतायुरन्ते शिवलोकमेति ॥ १३॥

॥ इति श्री मत् शंकराचार्य विरचित उमामहेश्वर स्तोत्रम् सम्पूर्णम ॥

॥ पशुपत्यष्टकम् स्तोत्रम् ॥

ध्यानम्

ध्याये न्नित्यं महेशं रजत गिरिनिभं चारु चन्द्रा वतसं
रत्ना कल्पो ज्ज्वलांगं परशु मृगवरा भीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणै- र्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिल भयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ १॥

पशुपतिं द्युपतिं धरणीपतिं
भुजगलोकपतिं च सतीपतिम् ।
प्रणतभक्तजनार्तिहरं
भजत रे मनुजा गिरिजापतिम् ॥ २॥

न जनको जननी न सोदरो
न तनयो न च भूरिबलं कुलम् ।
अवति कोऽपि न कालवशं गतं
भजत रे मनुजा गिरिजापतिम् ॥ ३॥

मुरजडिण्डिमवाद्यविलक्षणं
मधुरपञ्चमनादविशारदम् ।
प्रमथभूतगणैरपिसेवितं
भजत रे मनुजा गिरिजापतिम् ॥ ४॥

शरणदं सुखदं शरणान्वितं
शिव शिवेति शिवेति नतं नृणाम् ।
अभयदं करुणावरुणालयं
भजत रे मनुजा गिरिजापतिम् ॥ ५॥

नरशिरोरचितं मणिकुण्डलं
भुजगहारमुदं वृषभध्वजम् ।
चितिरजोधवलीकृतविग्रहं
भजत रे मनुजा गिरिजापतिम् ॥ ६॥

मखविनाशकरं शशिशेखरं
सततमध्वरभाजि फलप्रदम् ।
प्रलयदग्धसुरासुरमानवं
भजत रे मनुजा गिरिजापतिम् ॥ ७॥

मदमपास्य चिरं हृदिसंस्थितं
मरणजन्मजराभयपीडनम् ।
जगदुदीक्ष्य समीपभयाकुलं
भजत रे मनुजा गिरिजापतिम् ॥ ८॥

हरिविरिञ्चिसुराधिपपूजितं
यमजनेशधनेशनमस्कृतम् ।
त्रिनयनं भुवनत्रितयाधिपं
भजत रे मनुजा गिरिजापतिम् ॥ ९॥

पशुपतेरिदमष्टकमद्भुतं
विरचितं पृथिवीपतिसूरिणा ।
पठति संशृणुते मनुजः सदा
शिवपुरीं वसते लभते मुदम् ॥ १०॥

॥ इति श्री पृथिवी पति सूरिविरचितम् पशुत्यष्टकं सम्पूर्णम् ॥

॥ श्री विश्वनाथाष्टकम् स्तोत्रम् ॥

गङ्गा तरङ्ग रमणीय जटा कलापं
गौरी निरन्तर विभूषित वामभागम् ।
नारायण प्रियमनङ्ग मदापहारं
वाराणसी पुरपतिं भज विश्वनाथम् ॥१॥

वाचामगोचरमनेक गुणस्वरूपं
वागीश विष्णु सुरसेवित पादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसी पुरपतिं भज विश्वनाथम् ॥२॥

भूताधिपं भुजगभूषणभूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं
वाराणसी पुरपतिं भज विश्वनाथम् ॥३॥

शीतां शुशोभित किरीट विराजमानं
भालेक्षणानल विशोषित पञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपुरं
वाराणसी पुरपतिं भज विश्वनाथम् ॥४॥

पञ्चाननं दुरितमत्तमतङ्गजानां
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां
वाराणसी पुरपतिं भज विश्वनाथम् ॥५॥

तेजोमयं सगुणनिर्गुणमद्वितीयम्
आनन्दकन्दमपराजितमप्रमेयम्
नागात्मकं सकलनिष्कलमात्मरूपं ।
वाराणसी पुरपतिं भज विश्वनाथम् ॥६॥

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसी पुरपतिं भज विश्वनाथम् ॥७॥

आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसी पुरपतिं भज विश्वनाथम् ॥८॥

वाराणसी पुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ॥९॥

विश्वनाधाष्टकमिदं पुण्यं
यः पठेः शिव सन्निधौ
शिवलोकमवाप्नोति
शिवेनसह मोदते ॥ १०॥

॥ इति श्री महर्षि व्यास प्रणीतं विश्वनाथाष्टकं स्तोत्रम् सम्पूर्णम् ॥

॥ श्री शिव स्तुतिः (वन्दे शिवं शंकरम्) ॥

वन्दे देव उमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥१॥

वन्दे सर्वजगद्विहारमतुलं वन्देऽन्धकध्वंसिनं
वन्दे देवशिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे नागभुजङ्गभूषणधरं वन्दे शिवं चिन्मयं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥२॥

वन्दे दिव्यमचिन्त्यमद्वयमहं वन्देऽर्कदर्पापहं
वन्दे निर्मलमादिमूलमनिशं वन्दे मखध्वंसिनम् ।
बन्दे सत्यमनन्तमाद्यमभयं वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥३॥

वन्दे भूरथमम्बुजाक्षविशिखं वन्दे श्रुतित्रोटकं
वन्दे शैलशरासनं फणिगुणं वन्देऽधितूणीरकम् ।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥४॥

वन्दे पञ्चमुखाम्बुजं त्रिनयनं वन्दे ललाटेक्षणं
वन्दे व्योमगतं जटासुमुकुटं चन्द्रार्धगङ्गाधरम् ।
वन्दे भस्मकृतत्रिपुण्डुजटिलं वन्देष्टपूर्त्यात्मकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥५॥

वन्दे कालहरं हरं विषधरं वन्दे मृडं धूर्जटिं
वन्दे सर्वगतं दयामृतनिधिं वन्दे नृसिंहापहम् ।
वन्दे विप्रसुराचिताङ्घ्रिकमलं वन्दे भगाक्षापहं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥६॥

वन्दे मङ्गलराजताद्रिनिलयं वन्दे सुराधीश्वरं
वन्दे शङ्करमप्रमेयमतुलं वन्दे यमद्वेषिणम् ।
वन्दे कुण्डलिराजकुण्डलधरं वन्दे सहस्राननं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥७॥

वन्दे हंसमतीन्द्रियं स्मरहरं वन्दे विरूपेक्षणं
वन्दे भूतगणेशमव्ययमहं वन्देऽर्थराज्यप्रदम् ।
वन्दे सुन्दरसौरभेयगमनं वन्दे त्रिशूलायुधं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥८॥

वन्दे सूक्ष्ममनन्तमाद्यमभयं वन्देऽन्धकारापहं
वन्दे फूलननन्दिभृङ्गिविनतं वन्दे सुपर्णावृतम् ।
वन्दे शैलसुतार्धभागवपुषं वन्देऽभयं त्र्यम्बकं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥९॥

वन्दे पावनमम्बरात्मविभवं वन्दे महेन्द्रेश्वरं
वन्दे भक्तजनाश्रयामरतरुं वन्दे नताभीष्टदम् ।
वन्दे जह्नुसुताम्बिकेशमनिशं वन्दे गणाधीश्वरं
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥१०॥

॥ इति श्रीशिवस्तुतिः सम्पूर्णा ॥

॥ महा मृत्युञ्जय कवचम् ॥

भैरव उवाच श्रृणुष्व परमेशानि कवचं मन्मुखोदितम् । महामृत्युञ्जयस्यास्य न देयं परमाद्भुतम् ॥१॥
यं धृत्वा यं पठित्वा च श्रुत्वा च कवचोत्तमम् । त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ॥२॥
तदेववर्णयिष्यामि तव प्रीत्या वरानने । तथापि परमं तत्वं न दातव्यं दुरात्मने ॥३॥

विनियोग: अस्य श्रीमहामृत्युञ्जयकवचस्य श्रीभैरव ऋषिः । गायत्रीछन्दः । श्रीमहामृत्युञ्जयो महारुद्रो देवता । ॐ बीजं । जूं शक्तिः । सः कीलकं । हौमिति तत्वं । चतुर्वर्गसाधने मृत्युञ्जय कवच पाठे विनियोगः ।

चन्द्रमण्डलमध्यस्थं रुद्रं भाले विचिन्त्य तम् ।
तत्रस्थं चिन्तयेत् साध्यं मृत्युं प्राप्तोऽपि जीवति ॥१॥

ॐ जूं सः हौं शिरः पातु देवो मृत्युञ्जयो मम ।
ॐ श्रीं शिवो ललाटं मे ॐ हौं भ्रुवौ सदाशिवः ॥२॥

नीलकण्ठोऽवतान्नेत्रे कपर्दी मेऽवताच्छ्रुती ।
त्रिलोचनोऽवताद् गण्डौ नासां मे त्रिपुरान्तकः ॥३॥

मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः ।
हनुं मे हाटकेशनो मुखं बटुकभैरवः ॥४॥

कन्धरां कालमथनो गलं गणप्रियोऽवतु ।
स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु ॥५॥

नखान् मे गिरिजानाथः पायादङ्गुलिसंयुतान् ।
स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम ॥६॥

कुक्षिं कुबेरवरदः पार्श्वौ मे मारशासनः ।
शर्वः पातु तथा नाभिं शूली पृष्ठं ममावतु ॥७॥

शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः ।
कटिं कालान्तकः पायादूरू मेऽन्धकघातकः ॥८॥

जागरूकोऽवताज्जानू जङ्घे मे कालभैरवः ।
गुल्फो पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ॥९॥

पादादिमूर्धपर्यन्तमघोरः पातु मे सदा ।
शिरसः पादपर्यन्तं सद्योजातो ममावतु ॥१०॥

रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ।
पूर्वे बलविकरणो दक्षिणे कालशासनः ॥११॥

पश्चिमे पार्वतीनाथो ह्युत्तरे मां मनोन्मनः ।
ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः ॥१२॥

नैऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः ।
उर्ध्वे बलप्रमथनः पाताले परमेश्वरः ॥१३॥

दशदिक्षु सदा पातु महामृत्युञ्जयश्च माम् ।
रणे राजकुले द्यूते विषमे प्राणसंशये ॥१४॥

पायाद् ओं जूं महारुद्रो देवदेवो दशाक्षरः ।
प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ॥१५॥

सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ।
अर्धरात्रे महादेवो निशान्ते मां महोमयः ॥१६॥

सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ।
इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम् ॥१७॥

फलश्रुति

सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ।
पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम् ॥१८॥

य इदं च पठेन्मन्त्री कवचं वार्चयेत् ततः ।
तस्य हस्ते महादेवि त्र्यम्बकस्याष्ट सिद्धयः ॥१९॥

रणे धृत्वा चरेद्युद्धं हत्वा शत्रूञ्जयं लभेत् ।
जयं कृत्वा गृहं देवि सम्प्राप्स्यति सुखी पुनः ॥२०॥

महाभये महारोगे महामारीभये तथा ।
दुर्भिक्षे शत्रुसंहारे पठेत् कवचमादरात् ॥२१॥

सर्व तत् प्रशमं याति मृत्युञ्जयप्रसादतः ।
धनं पुत्रान् सुखं लक्ष्मीमारोग्यं सर्वसम्पदः ॥२२॥

प्राप्नोति साधकः सद्यो देवि सत्यं न संशयः
इतीदं कवचं पुण्यं महामृत्युञ्जयस्य तु ।
गोप्यं सिद्धिप्रदं गुह्यं गोपनीयं स्वयोनिवत् ॥२३॥

॥ इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये मृत्युञ्जयकवचं सम्पूर्णम् ॥

॥ मृतसञ्जीवन कवचम् ॥

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवनं नाम्ना कवचं प्रजपेत्सदा ॥ १॥

सारात् सारतरं पुण्यं गुह्याद्गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसञ्जीवनाभिधम् ॥ २॥

समाहितमना भूत्वा श्रृणुष्व कवचं शुभम् ।
श्रुत्वैतद् दिव्य कवचं रहस्यं कुरु सर्वदा ॥ ३॥

जराभयकरो यज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ॥ ४॥

दधानः शक्तिमभयां त्रिमुखं षड्भुजः प्रभुः ।
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥ ५॥

अष्टादशभुजोपेतो दण्डाभयकरो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदाऽवतु ॥ ६॥

खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।
रक्षोरूपी महेशो मां नैरृत्यां सर्वदाऽवतु ॥ ७॥

पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।
वरूणात्मा महादेवः पश्चिमे मां सदाऽवतु ॥ ८॥

गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥ ९॥

शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥ १०॥

शूलाभयकरः सर्वविद्यानमधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥ ११॥

ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदाऽवतु ।
शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥ १२॥

भ्रूमध्यं सर्वलोकेश स्त्रिनेत्रो लोचनेऽवतु ।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥ १३॥

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ॥ १४॥

मृत्युंजयो मुखं पातु कण्ठं मे नागभूषणः ।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥ १५॥

पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः ॥ १६॥

कटिद्वयं गिरीशो मे पृष्ठं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥ १७॥

जानुनी मे जगद्धर्ता जङ्घे मे जगदम्बिका ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥ १८॥

गिरिशः पातु मे भार्यां भवः पातु सुतान्मम ।
मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ॥ १९॥

सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥ २०॥

मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ॥ २१॥

यः पठेच्छृणुयान्नित्यं श्रावयेत्सुसमाहितः ।
स कालमृत्युं निर्जित्य सदायुष्यं समश्नुते ॥ २२॥

हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।
आधयो व्याधयस्तस्य न भवन्ति कदाचन ॥ २३॥

कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ॥ २४॥

युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥ २५॥

न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा ॥ २६॥

प्रातरुत्थाय सततं यः पठेत्कवचं शुभम् ।
अक्षय्यं लभते सौख्यमिह लोके परत्र च ॥ २७॥

सर्वव्याधि विनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ॥ २८॥

विचरत्यखिलाँलोकान् प्राप्य भोगांश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ॥ २९॥

मृतसञ्जीवनं नाम्ना देवतैरपि दुर्लभम् ॥ ३०॥

॥ इति श्रीवसिष्ठप्रणितं मृतसञ्जीवन स्तोत्रम् सम्पूर्णम् ॥

॥ अमोघ शिव कवचम् ॥

अमोघ शिवकवच परम हितकारी है और सारे डरों को दूर करने वाला है। इसके प्रभाव से मृत्यु के नजदीक पहुँचा हुआ रोगी भी शीघ्र निरोगता को प्राप्त करता है और उसकी दीर्घायु हो जाती है। जो निर्धन है उसकी सारी निर्धनता दूर हो जाती है और उसे सुख वैभव की प्राप्ति होती है। पापी अपने पापत्व से छूट जाता है और इसे श्रद्धापूर्वक धारण करने वाला निष्काम पुरुष देहांत के बाद दुर्लभ मोक्षपद को प्राप्त होता है। महर्षि ऋषभ ने इस "अमोघ शिवकवच" का उपदेश एक संकटग्रस्त राजा को देकर दु:खमुक्त किया था।

विनियोग:

ॐ अस्य श्री शिवकवच स्तोत्र मंत्रस्य ब्रह्मा ऋषि: अनुष्टप् छन्द:।
श्री सदाशिव रुद्रो देवता। ह्रीं शक्ति:। रं कीलकम्। श्रीं ह्री क्लीं बीजम्।
श्री सदाशिव प्रीत्यर्थे शिवकवच स्तोत्र जपे विनियोग:।

ऋष्यादिन्यास:

ॐ ब्रह्मर्षये नम: शिरसि। अनुष्टुप छन्दसे नम:, मुखे। श्री सदाशिव रुद्र देवतायै नम:, हृदि। ह्रीं शक्तये नम:, पादयो:। वं कीलकाय नम:, नाभौ। श्रीं ह्रीं क्लीमिति बीजाय नम:, गुह्ये। विनियोगाय नम: सर्वाङ्गे।

कर-न्यास

- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ ह्रांसर्वशक्तिधाम्ने ईशानात्मने अंगुष्ठाभ्यां नम:।**
- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नं रिं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां नम:।**
- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ मं रुं अनादिशक्तिधाम्ने अघोरात्मने मध्यामाभ्यां नम:।**
- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ शिं रैं स्वतंत्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नम:।**
- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ वांरौं अलुप्तशक्तिधाम्ने सद्यो जातात्मने कनिष्ठिकाभ्यां नम:।**
- **ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐयंर: अनादिशक्तिधाम्ने सर्वात्मने करतल करपृष्ठाभ्यां नम:।**

अंग न्यास:

- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ ह्रीं रां सर्वशक्तिधाम्ने ईशानात्मने हृदयाय नम:।**
- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ नं रीं नित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यां शिरसे स्वाहा।**
- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ मं रूं अनादिशक्तिधाम्ने अघोरात्मने शिखायै वषट्।**
- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ शिं रैं स्वतंत्रशक्तिधाम्ने वामदेवात्मने कवचाय हुम्।**
- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ वां रौं अलुप्तशक्तिधाम्ने सद्योजातात्मने नेत्रत्रयाय वौषट्।**
- **ॐ नमो भगवते ज्वलज्जवालामालिने ॐ यं र: अनादिशक्तिधाम्ने सर्वात्मने अस्त्राय फट्।**

- **ध्यानम्**

वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमम्।
सहस्रकरमत्युग्रं वंदे शंभुमुपतिम् ॥ १ ॥

- **ऋषभ उवाच**

अथापरं सर्वपुराणगुह्यं निशे:षपापौघहरं पवित्रम्।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥ २ ॥

- नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ।
  वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ ३ ॥
- शुचौ देशे समासीनो यथावत्कल्पितासन: ।
  जितेन्द्रियो जितप्राणश्चिंतयेच्छिवमव्ययम् ॥ ४ ॥

हृत्पुंडरीक तरसन्निविष्टं
स्वतेजसा व्याप्तनभोवकाशम् ।
अतीन्द्रियं सूक्ष्ममनंतताद्यं
ध्यायेत् परानंदमयं महेशम् ॥५॥

ध्यानावधूताखिलकर्मबन्ध
श्चरं चितानन्दनिमग्नचेता: ।
षडक्षरन्याससमाहितात्मा
शैवेन कुर्यात्कवचेन रक्षाम् ॥६॥

मां पातु देवोऽखिलदेवत्मा
संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमंत्रमूलं
धुनोतु मे सर्वमघं हृदिस्थम् ॥७॥

सर्वत्रमां रक्षतु विश्वमूर्ति
र्ज्योतिर्मयानंदघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेक:
स ईश्वर: पातु भयादशेषात् ॥८॥

यो भूस्वरूपेण बिर्भीत विश्वं
पायात्स भूमेर्गिरिशोऽष्टमूर्ति: ।
योऽपां स्वरूपेण नृणां करोति
संजीवनं सोऽवतु मां जलेभ्य: ॥ ९॥

कल्पावसाने भुवनानि दग्ध्वा
सर्वाणि यो नृत्यति भूरिलील: ।
स कालरुद्रोऽवतु मां दवाग्ने
र्वात्यादिभीतेरखिलाच्च तापात् ॥१०॥

प्रदीप्तविद्युत्कनकावभासो
विद्यावराभीति कुठारपाणि: ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्र:
प्राच्यां स्थितं रक्षतु मामजस्त्रम् ॥११॥

कुठारवेदांकुशपाशशूल
कपालढक्काक्षगुणान् दधान: ।
चतुर्मुखो नीलरुचिस्त्रिनेत्र:
पायादघोरो दिशि दक्षिणस्याम् ॥१२॥

कुंदेंदुशंखस्फटिकावभासो
वेदाक्षमाला वरदाभयांक: ।
त्र्यक्षश्चतुर्वक्र उरुप्रभाव:
सद्योधिजातोऽवस्तु मां प्रतीच्याम् ॥१३॥

वराक्षमालाभयटंकहस्त:
सरोज किंजल्कसमानवर्ण: ।
त्रिलोचनश्चारुचतुर्मुखो मां
पायादुदीच्या दिशि वामदेव: ॥१४॥

वेदाभ्येष्टांकुशपाश टंक
कपालढक्काक्षक शूलपाणि: ।
सितद्युति: पंचमुखोऽवतान्मा
मीशान ऊर्ध्वं परम प्रकाश: ॥१५॥

मूर्धानमव्यान्मम चंद्रमौलि-
र्भालं ममाव्यादथ भालनेत्र: ।
नेत्रे ममा व्याद्भगनेत्रहारी
नासां सदा रक्षतु विश्वनाथ: ॥१६॥

पायाच्छ्रु ती मे श्रुतिगीतकीर्ति:
कपोलमव्यात्सततं कपाली ।
वक्रं सदा रक्षतु पंचवक्रो
जिह्वां सदा रक्षतु वेदजिह्व: ॥१७॥

कंठं गिरीशोऽवतु नीलकण्ठ:
पाणि: द्वयं पातु: पिनाकपाणि: ।
दोर्मूलमव्यान्मम धर्मवाहु-
र्वक्ष:स्थलं दक्षमखातकोऽव्यात् ॥१८॥

मनोदरं पातु गिरींद्रधन्वा
मध्यं ममाव्यान्मदनांतकारी ।
हेरंबतातो मम पातु नाभिं
पायात्कटिं धूर्जटिरीश्वरो मे ॥१९॥

ऊरुद्वयं पातु कुबेर मित्रो
जानुद्वयं मे जगदीश्वरोऽव्यात् ।
जंघायुगं पुंगवकेतुरव्यात
पादौ ममाव्यत् सुरवंद्यपाद: ॥२०॥

महेश्वर: पातु दिनादियामे
मां मध्ययामेऽवतु वामदेव: ।
त्रिलोचन: पातु तृतीययामे
वृषध्वज: पातु दिनांत्ययामे ॥२१॥

पायान्निशादौ शशिशेखरो मां
गंगाधरो रक्षतु मां निशीथे ।
गौरी पति: पातु निशावसाने
मृत्युंजयो रक्षतु सर्वकालम् ॥२२॥

अन्त:स्थितं रक्षतु शंकरो मां
स्थाणु: सदापातु बहि: स्थित माम् ।
तदंतरे पातु पति: पशूनां
सदाशिवोरक्षतु मां समंतात् ॥२३॥

तिष्ठतमव्याद्भुवनैकनाथ:
पायाद् व्रजन्तं प्रथमाधिनाथ: ।
वेदांतवेद्योऽवतु मां निषण्णं
मामव्यय: पातु शिव: शयानम् ॥२४॥

मार्गेषु मां रक्षतु नीलकंठ:
शैलादि दुर्गेषु पुरत्रयारि: ।
अरण्य वासादि महाप्रवासे
पायान्मृगव्याध उदारशक्ति: ॥२५॥

कल्पांतकोटोपपटुप्रकोप-
स्फुटाट्टहासोच्चलितांडकोश: ।
घोरारिसेनर्णवदुर्निवार
महाभयाद्रक्षतु वीरभद्र: ॥२६॥

पत्त्यश्वमातंगघटावरूथ
सहस्र लक्षा युतकोटि भीषणम् ।
अक्षौहिणीनां शतमाततायिनां
छिंद्यान्मृडोघोर कुठार धारया ॥२७॥

निहन्तु दस्यून् प्रलयानलार्चि-
र्ज्वलत् त्रिशूलं त्रिपुरांतकस्य ।
शार्दूल सिंहर्क्षवृकादिहिंस्रान्
संत्रासयत्वीशधनु: पिनाक: ॥२८॥

दु:स्वप्नदु:शकुनदुर्गतिदौर्मनस्य-
र्दुर्भिक्षदुर्व्यसनदु:सहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्ति
व्याधींश्च नाशयतु मे जगतामधीश: ॥२९॥

ॐ नमो भगवते सदाशिवाय सकल तत्त्वात्मकाय, सकल तत्त्व विहाराय, सकल लोकैक कर्त्रे, सकल लोकैक भर्त्रे, सकल लोकैक हर्त्रे, सकल लोकैक गुरवे, सकल लोकैक साक्षिणे, सकल निगम गुह्याय, सकल वरप्रदाय, सकल दुरितार्त्ति भंजनाय, सकल जगद भयंकराय, सकल लोकैक शंकराय, शशांक शेखराय, शाश्वत निजा भासाय, निर्गुणाय, निरुपमाय, नीरुपाय, निराभासाय, निरामयाय, निष्प्रपंचाय, निष्कलंकाय, निर्द्वंद्वाय, नि:संगाय, निर्मलाय, निर्गमाय, नित्य रुप विभवाय, निरुपम विभवाय, निराधाराय, नित्य शुद्ध बुद्ध परिपूर्ण सच्चिदानंदाद्वयाय, परमशांत प्रकाशते जोरुपाय, जय जय महारुद्र, महारौद्र, भद्रावतार, दुखदावदारण, महाभैरव, कालभैरव, कल्पांतभैरव, कपालमालाधर, खट्वांग, खड्ग, चर्म, पाशांकुश, डमरु, शूल, चाप, बाण, गदा, शक्ति, भिंदिपाल, तोमर,

मुसल, मुद्गर, पट्टि, परशु, परिघ, भुशुण्डी, शतघ्नी, चक्राद्यायुध, भीषणकर, सहस्रमुख, दंष्ट्राकराल, विकटाट्टहास, विस्फारित, ब्रह्मांड मंडल, नागेंद्रकुंडल, नागेंद्रहार, नागेन्द्रवलय, नागेंद्रचर्मधर, मृयुंजय, त्र्यंबक, त्रिपुरान्तक, विरूपाक्ष, विश्वेश्वर, विश्वरूप, वृषभवाहन, विषविभूषण, विश्वतोमुख, सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्यु भयमप मृत्युभयं नाशय नाशय रोग भय मुत्सादयोत् सादय विषसर्पभयं शमय शमय चोरभयं मारय मारय मम शत्रुन् उच्चाट्योच्चाटय, त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वांगेन विपोथय विपोथय, मुसलेन निष्पेषय निष्पेषय, बाणै: संताडय संताडय, रक्षांसि भीषय भीषय, भूतानि विद्रावय विद्रावय, कूष्मांड, वेताल, मारीगण, ब्रह्मराक्षसान् संत्रासय संत्रासय, मामभयं कुरु कुरु, वित्रस्तं मामा श्वासया श्वासय, नरक भयान् मामुद्धारयोद्धारय संजीवय संजीवय, क्षुत्तृड्भ्यां मामाप्याय-याप्यायय, दु:खातुरं मामा नन्दयानन्दय, शिव कवचेन मामाच्छादयाच्छादय, त्र्यंबक सदाशिव नमस्ते नमस्ते नमस्ते ।

- ऋषभ उवाच

इत्येतत्कवचं शैवं वरदं व्याहृतं मया ॥
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥३०॥

य: सदा धारयेन्मर्त्य: शैवं कवचमुत्तमम् ।
न तस्य जायते क्वापि भयं शंभोरनुग्रहात् ॥३१॥

क्षीणायुर्मृत्युमापन्नो महारोगहतोऽपि वा ।
सद्य: सुखमवाप्नोति दीर्घमायुश्च विंदति ॥३२॥

सर्वदारिद्र्य शमनं सौमंगल्य विवर्धनम् ।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥३३॥

महापातक संघातैर्मुच्यते चोपपातकै: ।
देहान्ते शिवमाप्नोति शिववर्मानुभावत: ॥३४॥

त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम्
धारयस्व मया दत्तं सद्य: श्रेयो ह्यवाप्स्यसि ॥३५॥

- सूत उवाच

इत्युक्त्वाऋषभो योगी तस्मै पार्थिवसूनवे ।
ददौ शंखं महारावं खड्गं चारिनिषूदनम् ॥३६॥

पुनश्च भस्म संमत्र्य तदंगं परितोऽस्पृशत् ।
गजानां षट्सहस्रस्य द्विगुणस्य बलं ददौ ॥३७॥

॥ इति श्री स्कन्द पुराणे एकाशीति साहस्त्रयां तृतीये ब्रह्मोत्तर खण्डे अमोघ शिव कवचम् सम्पूर्णम् ॥

॥ ब्रह्माण्डविजय श्री शिव कवचम् ॥

- **नारद उवाच**

शिवस्य कवचं ब्रूहि मत्स्य राजेन यद्धृतम् ।
नारायण महाभाग श्रोतुं कौतूहलं मम ॥ ॥ १॥

- **श्रीनारायण उवाच**

कवचं शृणु विप्रेन्द्र शङ्करस्य महात्मनः ।
ब्रह्माण्ड विजयं नाम सर्वाऽवयव रक्षणम् ॥ ॥ २॥

- पुरा दुर्वाससा दत्तं मत्स्यस्य राजाय धीमते ।
दत्वा षडक्षरं मन्त्रं सर्व पाप प्रणाशनम् ॥ ॥ ३॥
- स्थिते च कवचे देहे नास्ति मृत्युश्च जीविनाम् ।
अस्त्रेशस्त्रेजलेवह्नौ सिद्धिश्चेन्नास्ति संशयः ॥ ॥ ४॥
- यद्धृत्वा पठनात् बाणः शिवत्वं प्रापलीलया ।
बभूव शिवतुल्यश्च यद्धृत्वा नन्दिकेश्वरः ॥ ॥ ५॥
- वीरश्रेष्ठो वीरभद्रो साम्बोऽभूद् धारणाद्यतः ।
त्रैलोक्य विजयी राजा हिरण्यकशिपुः स्वयम् ॥ ॥ ६॥
- हिरण्याक्षश्च विजयी चाऽभवद् धारणाद्धि सः ।
यद्धृत्वा पठनात् सिद्धो दुर्वासा विश्व पूजितः ॥ ॥ ७॥
- जैगीषव्यो महायोगी पठनाद् धारणाद्यतः ।
यद्धृत्वा वामदेवश्च देवलः पवनः स्वयम् ॥ ॥ ८॥
- अगस्त्यश्च पुलस्त्यश्चाऽभवत् विश्वपूजितः ॥ ॥ ९॥

- **श्री शिव कवचम्**

ॐ नमः शिवायेति च मस्तकं मे सदाऽवतु ।
ॐ नमः शिवायेति च स्वाहा भालं सदाऽवतु ॥ ॥ १॥

- ॐ ह्रीं श्रीं क्लीं शिवायेति स्वाहा नेत्रे सदाऽवतु ।
ॐ ह्रीं क्लीं हूं शिवायेति नमो मे पातु नासिकाम् ॥ ॥ २॥
- ॐ नमः शिवाय शान्ताय स्वाहा कण्ठं सदाऽवतु ।
ॐ ह्रीं श्रीं हूं संसार कर्त्रे स्वाहा कर्णौ सदावतु ॥ ॥ ३॥
- ॐ ह्रीं श्रीं पञ्चवक्त्राय स्वाहा दन्तं सदावतु ।
ॐ ह्रीं महेशाय स्वाहा चाऽधरं पातु मे सदा ॥ ॥ ४॥
- ॐ ह्रीं श्रीं क्लीं त्रिनेत्राय स्वाहा केशान् सदाऽवतु ।
ॐ ह्रीं ऐं महादेवाय स्वाहा वक्षः सदाऽवतु ॥ ॥ ५॥

- ॐ ह्रीं श्रीं क्लीं मे रुद्राय स्वाहा नाभिं सदाऽवतु ।
  ॐ ह्रीं ऐं श्रीं श्रीं ईश्वराय स्वाहा पृष्ठं सदाऽवतु ॥ ॥ ६॥
- ॐ ह्रीं क्लीं मृतुञ्जयाय स्वाहा भ्रुवौ सदाऽवतु ।
  ॐ ह्रीं श्रीं क्लीं ईशानाय स्वाहा पार्श्वं सदाऽवतु ॥ ॥ ७॥
- ॐ ह्रीं ईश्वराय स्वाहा चोदरं पातु मे सदा ।
  ॐ श्रीं ह्रीं मृत्युञ्जयाय स्वाहा बाहू सदाऽवतु ॥ ॥ ८॥
- ॐ ह्रीं श्रीं क्लीं ईश्वराय स्वाहा पातु करौ मम ।
  ॐ महेश्वराय रुद्राय नितम्बं पातु मे सदा ॥ ॥ ९॥
- ॐ ह्रीं श्रीं भूतनाथाय स्वाहा पादौ सदाऽवतु ।
  ॐ सर्वेश्वराय शर्वाय स्वाहा पादौ सदाऽवतु ॥ ॥१०॥
- प्राच्यां मां पातु भूतेशः आग्नेय्यां पातु शङ्करः ।
  दक्षिणे पातु मां रुद्रो नैऋत्यां स्थाणुरेव च ॥ ॥११॥
- पश्चिमे खण्डपरशुर्वायव्यां चन्द्रशेखरः ।
  उत्तरे गिरिशः पातु चैशान्यां ईश्वरः स्वयम् ॥ ॥१२॥
- ऊर्ध्वे मृडः सदा पातु चाऽधो मृत्युञ्जयः स्वयम् ।
  जले स्थले चाऽन्तरिक्षे स्वप्ने जागरणे सदा ॥ ॥१३॥
- पिनाकी पातु मां प्रीत्या भक्तं वै भक्तवत्सलः ॥ ॥१४॥

- **फलश्रुतिः**

इति ते कथितं वत्स कवचं परमाऽद्भुतम् ॥ ॥१५॥

- दश लक्ष जपेनैव सिद्धिर्भवति निश्चितम् ।
  यदि स्यात् सिद्ध कवचो रुद्र तुल्यो भवेद् ध्रुवम् ॥ ॥१६॥
- तव स्नेहान् मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित् ।
  कवचं काण्व शाखोक्तं अतिगोप्यं सुदुर्लभम् ॥ ॥१७॥
- अश्वमेध सहस्राणि राजसूय शतानि च ।
  सर्वाणि कवचस्यास्य फलं नार्हन्ति षोडशीम्॥ ॥१८॥
- कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ।
  सर्वज्ञः सर्वसिद्धेशो मनोयायी भवेद् ध्रुवम् ॥ ॥१९॥
- इदं कवचं अज्ञात्वा भवेत् यः शङ्करप्रभुम् ।
  शतलक्षं प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ ॥२०॥

॥ इति श्री ब्रह्मवैवर्ते पुराणे गणपतिखण्डे ब्रह्माण्ड विजय शिव कवचम् सम्पूर्णम् ॥

॥ श्री रुद्र कवचम् ॥

- **विनियोग** ॐ अस्य श्री रुद्र कवच स्तोत्र महा मंत्रस्य । दूर्वासऋषिः । अनुष्टुप् छंदः । त्र्यंबक रुद्रो देवता । ह्राम् बीजम् । श्रीम् शक्तिः । ह्रीम् कीलकम् । मम मनसोभीष्टसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादिषड्बीजैः षडंगन्यासः ॥

- **ध्यानम्**

  शांतम् पद्मासनस्थम् शशिधरमकुटम्
  पंचवक्त्रम् त्रिनेत्रम् शूलम् वज्रंच खड्गम्
  परशुमभयदम् दक्षभागे महन्तम् ।
  नागम् पाशम् च घंटाम् प्रळय हुतवहम्
  सांकुशम् वामभागे नानालंकारयुक्तम्
  स्फटिकमणिनिभम् पार्वतीशम् नमामि ॥

- **दूर्वास उवाच**

  प्रणम्य शिरसा देवम् स्वयंभु परमेश्वरम् ।
  एकम् सर्वगतम् देवम् सर्वदेवमयम् विभुम् ।

  - रुद्र वर्म प्रवक्ष्यामि अंग प्राणस्य रक्षये ।
    अहोरात्रमयम् देवम् रक्षार्थम् निर्मितम् पुरा ॥
  - रुद्रो मे जाग्रतः पातु पातु पार्श्वौहरस्तथा ।
    शिरोमे ईश्वरः पातु ललाटम् नीललोहितः ।
  - नेत्रयोस्त्र्यंबकः पातु मुखम् पातु महेश्वरः ।
    कर्णयोः पातु मे शंभुः नासिकायाम् सदाशिवः ॥
  - वागीशः पातु मे जिह्वाम् ओष्ठौ पात्वंबिकापतिः ।
    श्रीकण्ठः पातु मे ग्रीवाम् बाहो चैव पिनाकधृत् ।
  - हृदयम् मे महादेवः ईश्वरोव्यात् स्सनान्तरम् ।
    नाभिम् कटिम् च वक्षश्च पातु सर्वम् उमापतिः ॥
  - बाहुमध्यान्तरम् चैव सूक्ष्म रूपस्सदाशिवः ।
    स्वरंरक्षतु मेश्वरो गात्राणि च यथा क्रमम्
  - वज्रम् च शक्तिदम् चैव पाशांकुशधरम् तथा ।
    गण्डशूलधरान्नित्यम् रक्षतु त्रिदशेश्वरः ॥

- प्रस्तानेषु पदे चैव वृक्षमूले नदीतटे संध्यायाम्
  राजभवने विरूपाक्षस्तु पातु माम् ।

- शीतोष्णा दथकालेषु तुहिनद्रुमकंटके ।
  निर्मनुष्ये समे मार्गे पाहि माम् वृषभध्वज ॥

- इत्येतद्रुद्रकवचम् पवित्रम् पापनाशनम् ।
  महादेव प्रसादेन दूर्वास मुनिकल्पितम् ।

- ममाख्यातम् समासेन नभयम् तेनविद्यते ।
  प्राप्नोति परम आरोग्यम् पुण्यमायुष्यवर्धनम् ॥

- विद्यार्थी लभते विद्याम् धनार्थी लभते धनम् ।
  कन्यार्थी लभते कन्याम् नभय विन्दते क्वचित् ।

- अपुत्रो लभते पुत्रम् मोक्षार्थी मोक्ष माप्नुयात् ।
  त्राहि त्राहि महादेव त्राहि त्राहि त्रयीमय ॥

- त्राहिमाम् पार्वतीनाथ त्राहिमाम् त्रिपुरंतकपाशम्
  खट्वांग दिव्यास्त्रम् त्रिशूलम् रुद्रमेवच ।

- नमस्करोमि देवेश त्राहिमाम् जगदीश्वर ।
  शत्रु मध्ये सभामध्ये ग्राममध्ये गृहान्तरे ॥

- गमनेगमने चैव त्राहिमाम् भक्तवत्सल ।
  त्वम् चित्वमादितश्चैव त्वम् बुद्धिस्त्वम् परायणम् ।

- कर्मणामनसा चैव त्वंबुद्धिश्च यथा सदा ।
  सर्व ज्वर भयम् छिन्दि सर्व शत्रून्निवक्त्याय ॥

- सर्व व्याधिनिवारणम् रुद्रलोकम् सगच्छति
  रुद्रलोकम् सगच्छत्योन्नमः ॥

॥ इति स्कंद पुराणे दूर्वास प्रोक्तम् श्री रुद्र कवचम् सम्पूर्णम् ॥

॥ शिव अष्टोत्तरशतनाम स्तोत्रम् - १ ॥

देवा ऊचु:

जय शम्भो विभो रुद्र स्वयम्भो जय शङ्कर।
जयेश्वर जयेशान जय सर्वज्ञ कामद ॥ १॥

नीलकण्ठ जय श्रीद श्रीकण्ठ जय धूर्जटे।
अष्टमूर्तेऽनन्तमूर्ते महामूर्ते जयानघ ॥ २॥

जय पापहरानङ्गनि:सङ्गाभङ्गनाशन।
जय त्वं त्रिदशाधार त्रिलोकेश त्रिलोचन ॥ ३॥

जय त्वं त्रिपथाधार त्रिमार्ग त्रिभिरूर्जित।
त्रिपुरारे त्रिधामूर्ते जयैकत्रिजटात्मक ॥ ४॥

शशिशेखर शूलेश पशुपाल शिवाप्रिय।
शिवात्मक शिव श्रीद सुहृच्छ्रीशतनो जय ॥ ५॥

सर्व सर्वेश भूतेश गिरिश त्वं गिरीश्वर।
जयोग्ररूप मीमेश भव भर्ग जय प्रभो ॥ ६॥

जय दक्षाध्वरध्वंसिन्नन्धकध्वंसकारक।
रुण्डमालिन् कपालिंस्थं भुजङ्गाजिनभूषण ॥ ७॥

दिगम्बर दिशां नाथ व्योमकश चिताम्पते।
जयाधार निराधार भस्माधार धराधर ॥ ८॥

देवदेव महादेव देवतेशादिदैवत।
वह्निवीर्य जय स्थाणो जयायोनिजसम्भव ॥ ९॥

भव शर्व महाकाल भस्माङ्ग सर्पभूषण।
त्र्यम्बक स्थपते वाचाम्पते भो जगताम्पते ॥ १०॥

शिपिविष्ट विरूपाक्ष जय लिङ्ग वृषध्वज।
नीललोहित पिङ्गाक्ष जय खट्वाङ्गमण्डन ॥ ११॥

कृत्तिवास अहिर्बुध्न्य मृडानीश जटाम्बुभृत्।
जगद्भ्रातर्जगन्मातर्जगत्तात जगद्गुरो ॥ १२॥

पञ्चवक्त्र महावक्त्र कालवक्त्र गजास्यभृत्।
दशबाहो महाबाहो महावीर्य महाबल ॥ १३॥

अघोरघोरवक्त्र त्वं सद्योजात उमापते।
सदानन्द महानन्द नन्दमूर्ते जयेश्वर ॥ १४॥

एवमष्टोत्तरशतं नाम्नां देवकृतं तु ये।
शम्भोर्भक्त्या स्मरन्तीह शृण्वन्ति च पठन्ति च ॥ १५॥

न तापास्त्रिविधास्तेषां न शोको न रुजादय:।
ग्रहगोचरपीडा च तेषां क्वापि न विद्यते ॥ १६॥

श्री: प्रज्ञाऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम्।
विद्या धर्मे मति: शम्भोर्भक्तिस्तेषां न संशय: ॥ १७॥

॥ इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे शिवाष्टोत्तरनाम शतकस्तोत्रम् सम्पूर्णम् ॥

॥ शिव अष्टोत्तरशतनाम स्तोत्रम् - २ ॥

शिवो महेश्वर: शम्भु: पिनाकी शशिशेखर:।
वामदेवो विरुपाक्ष: कपर्दी नीललोहित: ॥१॥

शंकर: शूलपाणिश्च खट्वांगी विष्णुवल्लभ:।
शिपिविष्टोऽम्बिकानाथ: श्रीकण्ठो भक्तवत्सल: ॥२॥

भव: शर्वस्त्रिलोकेश: शितिकण्ठ: शिवाप्रिय: ।
उग्र: कपालि: कामारिरन्धकासुरसूदन: ॥३॥

गंगाधरो ललाटाक्ष: कालकाल: कृपानिधि।
भीम: परशुहस्तश्च मृगपाणिर्जटाधर: ॥४॥

कैलासवासी कवची कठोरस्त्रिपुरान्तक:।
वृषांको वृषभारूढो भस्मोद्धूलितविग्रह: ॥५॥

सामप्रिय: स्वरमयस्त्रयीमूर्तिरनीश्वर:।
सर्वज्ञ: परमात्मा च सोमसूर्याग्निलोचन: ॥६॥

हविर्यज्ञमय: सोम: पंचवक्त्र: सदाशिव:।
विश्वेश्वरो वीरभद्रो गणनाथ: प्रजापति: ॥७॥

हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघ:।
भुजंगभूषणो भर्गो गिरिधन्वा गिरिप्रिय: ॥८॥

कृत्तिवासा पुरारातिर्भगवान् प्रमथाधिप:।
मृत्युंजय: सूक्ष्मतनुर्जगद् व्यापी जगद्गुरु: ॥९॥

व्योमकेशो महासेनजनकश्चारुविक्रम:।
रुद्रो भूतपति: स्थाणुरहिर्बुध्न्यो दिगम्बर: ॥१०॥

अष्टमूर्तिरनेकात्मा सात्त्विक: शुद्धविग्रह:।
शाश्वत: खण्डपरशुरजपाशविमोचक: ॥११॥

मृड: पशुपतिर्देवो महादेवोऽव्यय: प्रभु: ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हर: ॥१२॥

भगनेत्रभिदव्यक्त: सहस्त्राक्ष: सहस्त्रपात् ।
अपवर्गप्रदोऽनन्तस्तारक: परमेश्वर: ॥१३॥

एतदष्टोत्तरशतनाम्नामाम्नायेन सम्मितम् ।
विष्णुना कथितं पूर्वं पार्वत्या इष्टसिद्धये ॥१४॥

शंकरस्य प्रिया गौरी जपित्वा त्रैकालमन्वहम्।
नोदिता पद्मनाभेन वर्षमेकं प्रयत्नत: ॥१५॥

अवाप सा शरीरार्धं प्रसादाच्छूंलधारिण: ।
यस्त्रिसंध्यं पठेच्छम्भोर्नाम्नामष्टोत्तरं शतम् ॥१६॥

शतरुद्रित्रिरावृत्त्या यत्फलं प्राप्यते नरै: ।
तत्फलं प्राप्नुयादेतदेकवृत्त्या जपन्नर: ॥१७॥

बिल्वपत्रै: प्रशस्तैर्वा पुष्पैश्च तुलसीदलै: ।
तिलाक्षतैर्यजेद् यस्तु जीवन्मुक्तो न संशय ॥१८॥

नाम्नामेषां पशुपतेरेकमेवापवर्गदम्।
अन्येषां चावशिष्टानां फलं वक्तुं न शक्यते ॥१९॥

॥ इति श्रीशिवरहस्ये गौरीनारायणसंवादे शिवाष्टोत्तरशतदिव्य नामामृतस्तोत्रं सम्पूर्णम् ॥

॥ शिव अष्टोत्तरशत नामावली ॥

1. ॐ भोलेनाथ नमः
2. ॐ कैलाश पति नमः
3. ॐ भूतनाथ नमः
4. ॐ नंदराज नमः
5. ॐ नन्दी की सवारी नमः
6. ॐ ज्योतिलिंग नमः
7. ॐ महाकाल नमः
8. ॐ रुद्रनाथ नमः
9. ॐ भीमशंकर नमः
10. ॐ नटराज नमः
11. ॐ प्रलेयन्कार नमः
12. ॐ चंद्रमोली नमः
13. ॐ डमरूधारी नमः
14. ॐ चंद्रधारी नमः
15. ॐ मलिकार्जुन नमः
16. ॐ भीमेश्वर नमः
17. ॐ विषधारी नमः
18. ॐ बम भोले नमः
19. ॐ ओंकार स्वामी नमः
20. ॐ ओंकारेश्वर नमः
21. ॐ शंकर त्रिशूलधारी नमः
22. ॐ विश्वनाथ नमः
23. ॐ अनादिदेव नमः
24. ॐ उमापति नमः
25. ॐ गोरापति नमः
26. ॐ गणपिता नमः
27. ॐ भोले बाबा नमः
28. ॐ शिवजी नमः
29. ॐ शम्भु नमः
30. ॐ नीलकंठ नमः
31. ॐ महाकालेश्वर नमः
32. ॐ त्रिपुरारी नमः
33. ॐ त्रिलोकनाथ नमः
34. ॐ त्रिनेत्रधारी नमः
35. ॐ बर्फानी बाबा नमः
36. ॐ जगतपिता नमः
37. ॐ मृत्युन्जन नमः
38. ॐ नागधारी नमः
39. ॐ रामेश्वर नमः
40. ॐ लंकेश्वर नमः
41. ॐ अमरनाथ नमः
42. ॐ केदारनाथ नमः
43. ॐ मंगलेश्वर नमः
44. ॐ अर्धनारीश्वर नमः
45. ॐ नागार्जुन नमः
46. ॐ जटाधारी नमः
47. ॐ नीलेश्वर नमः
48. ॐ गलसर्पमाला नमः
49. ॐ दीनानाथ नमः
50. ॐ सोमनाथ नमः
51. ॐ जोगी नमः
52. ॐ भंडारी बाबा नमः
53. ॐ बमलेहरी नमः
54. ॐ गोरीशंकर नमः
55. ॐ शिवाकांत नमः
56. ॐ महेश्वराए नमः
57. ॐ महेश नमः
58. ॐ ओलोकानाथ नमः
59. ॐ आदिनाथ नमः
60. ॐ देवदेवेश्वर नमः
61. ॐ प्राणनाथ नमः
62. ॐ शिवम् नमः
63. ॐ महादानी नमः
64. ॐ शिवदानी नमः
65. ॐ संकटहारी नमः
66. ॐ महेश्वर नमः
67. ॐ रुंडमालाधारी नमः
68. ॐ जगपालनकर्ता नमः
69. ॐ पशुपति नमः
70. ॐ संगमेश्वर नमः
71. ॐ दक्षेश्वर नमः
72. ॐ घ्रेनश्वर नमः
73. ॐ मणिमहेश नमः
74. ॐ अनादी नमः
75. ॐ अमर नमः
76. ॐ आशुतोष महाराज नमः
77. ॐ विलवकेश्वर नमः
78. ॐ अचलेश्वर नमः
79. ॐ अभयंकर नमः
80. ॐ पातालेश्वर नमः
81. ॐ धूधेश्वर नमः
82. ॐ सर्पधारी नमः
83. ॐ त्रिलोकिनरेश नमः
84. ॐ हठ योगी नमः
85. ॐ विश्लेश्वर नमः
86. ॐ नागाधिराज नमः
87. ॐ सर्वेश्वर नमः
88. ॐ उमाकांत नमः
89. ॐ बाबा चंद्रेश्वर नमः
90. ॐ त्रिकालदर्शी नमः
91. ॐ त्रिलोकी स्वामी नमः
92. ॐ महादेव नमः
93. ॐ गढ़शंकर नमः
94. ॐ मुक्तेश्वर नमः
95. ॐ नटेषर नमः
96. ॐ गिरजापति नमः
97. ॐ भद्रेश्वर नमः
98. ॐ त्रिपुनाशक नमः
99. ॐ निर्जेश्वर नमः
100. ॐ किरातेश्वर नमः
101. ॐ जागेश्वर नमः
102. ॐ अबधूतपति नमः
103. ॐ भीलपति नमः
104. ॐ जितनाथ नमः
105. ॐ वृषेश्वर नमः
106. ॐ भूतेश्वर नमः
107. ॐ बैजूनाथ नमः
108. ॐ नागेश्वर नमः

॥ अथ शिव सहस्त्रनाम स्तोत्रम् ॥

ॐ स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥ १

जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ २

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ॥ ३

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥ ४

महारुपो महाकायो वृषरुपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरुपो महाहनुः ॥ ५

लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥ ६

सर्वकर्मा स्वयम्भूत आदिरादिकरो निधिः ।
सहस्त्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ॥ ७

चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ॥ ८

महातपा घोरतपो अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रं प्रमाणं परमं तपः ॥ ९

योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥ १०

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरुपः स्वयं श्रेष्ठो बलवीरोऽबलो गणः ॥ ११

गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित् परमो मन्त्रः सर्वभावकरो हरः ॥ १२

कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान् ॥ १३

स्रुवहस्तः सुरुपश्च तेजस्तेजकरो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनयस्तथा ॥ १४

दीर्घश्च हरिकेश्च सुतीर्थः कृष्ण एव च ।
श्रृगालरुपः सिद्धार्थो मुण्डः सर्वशुभङ्करः ॥ १५

अजश्च बहुरुपश्च गन्धधारी कपर्द्यपि ।
उर्ध्वरेता उर्ध्वलिङ्ग उर्ध्वशायी नभस्थलः ॥ १६

त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ॥ १७

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिँहशार्दूलरुपश्च आर्द्रचर्माम्बरावृतः ॥ १८

कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ १९

बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥ २०

घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्त्रहस्त्रो विजयो व्यवसायो ह्यतन्द्रितः ॥ २१

अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥ २२

तेजोऽपहारी बलहा मुदितोऽर्थोऽजितोऽवरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ २३

न्यग्रोधरुपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ २४

विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥ २५

विष्णु प्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ २६

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धीः सर्वविग्रह एव च ॥ २७

शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वेणवी पणवी ताली खली कालकटंकटः ॥ २८

नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः ॥ २९

विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा ॥ ३०

सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरुपो गुहावासी गुहो माली तरङ्गवित् ॥ ३१

त्रिदशस्त्रिकालधृक् कर्म सर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधिशत्रुविनाशनः ॥ ३२

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञोऽतुल्यो यज्ञोविभागवित् ॥ ३३

सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरोऽयज्ञः सर्वधारी धरोत्तमः ॥ ३४

लोहिताज्ञो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ ३५

मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरुपधृक ॥ ३६

सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरुपश्च निपाती ह्यवशः खगः ॥ ३७

रौद्ररुपोंऽशुरादित्यो बहुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ३८

सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः सम्भग्नश्च सहस्रदः ॥ ३९

पक्षी च पक्षरुपश्च अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥ ४०

वामदेवश्च वामश्च प्राग् दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ॥ ४१

भिक्षुश्च भिक्षुरुपश्च विपणो मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिर्भागो गवां पतिः ॥ ४२

वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥ ४३

वाचस्पत्यो वाजसेनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥ ४४

ईशानः ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ॥ ४५

नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥ ४६

चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ॥ ४७

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥ ४८

दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥ ४९

अक्षरं परमं ब्रह्म बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥ ५०

बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान समरमर्दनः ॥ ५१

महामेघनिवासी च महाघोरो वशी करः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥ ५२

वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः ।
नीलास्तथाङ्गलुब्धश्च शोभनो निरविग्रहः ॥ ५३

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥ ५४

कृष्णवर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥ ५५

महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥ ५६

महानासो महाकम्बुर्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥ ५७

लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ ५८

महानखो महारोमा महाकोशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥ ५९

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ६०

गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्त्रामितेक्षणः ॥ ६१

यजुः पादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥ ६२

उपकार: प्रिय: सर्व: कनक: काञ्चनच्छवि: ।
नाभिर्नन्दिकरो भाव: पुष्करस्थपति: स्थिर: ॥ ६३

द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहित: ।
नक्तं कलिश्च कालश्च मकर: कालपूजित: ॥ ६४

सगणो गणकारश्च भूतवाहनसारथि: ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गण: ॥ ६५

लोकपालस्तथालोको महात्मा सर्वपूजित: ।
शुक्लस्त्रिशुक्ल: सम्पन्न: शुचिर्भूतनिषेवित: ॥ ६६

आश्रमस्थ: क्रियावस्थो विश्वकर्ममतिर्वर: ।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजाल: सुनिश्चल: ॥ ६७

कपिल: कपिश: शुक्ल आयुश्चैव परोऽपर: ।
गन्धर्वो ह्यदितिस्तार्क्ष्य: सुविज्ञेय: सुशारद: ॥ ६८

परश्वधायुधो देवो अनुकारी सुबान्धव: ।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशय: ॥ ६९

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दित: ।
सर्वाङ्गरुपो मायावी सुहृदो ह्यनिलोऽनल: ॥ ७०

बन्धनो बन्धकर्ता च सुबन्धनविमोचन: ।
सयज्ञारि: सकामारिर्महादंष्ट्रो महायुध: ॥ ७१

बहुधा निन्दित: शर्व: शङ्कर: शङ्करोऽधन: ।
अमरेशो महादेवो विश्वदेव: सुरारिहा ॥ ७२

अहिर्बध्न्योऽनिलाभश्च चेकितानो हविस्तथा ।
अजैकपाच्च कापाली त्रिशङ्कुरजित: शिव: ॥ ७३

धन्वन्तरिर्धूमकेतु: स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धर: ॥ ७४

प्रभाव: सर्वगो वायुर्यमा सविता रवि: ।
उषङ्गुश्च विधाता च मान्धाता भूतभावन: ॥ ७५

विभुर्वर्णविभावी च सर्वकामगुणावह: ।
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनल ॥ ७६

बलवांश्चोपशान्तश्च पुराण: पुण्यचञ्चुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषध: ॥ ७७

सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पति: ।
देवदेव: सुखासक्त: सदसत्सर्वरत्नवित् ॥ ७८

कैलासगिरिवासी च हिमवद्गिरिसंश्रय: ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रद: ॥ ७९

वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छद: ।
सारग्रीवो महाजत्रुरलोलश्च महौषध: ॥ ८०

सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तर: ।
सिँहनाद: सिँहदंष्ट्र: सिँहग: सिंहवाहन: ॥ ८१

प्रभावात्मा जगत्कालस्थालो लोकहितस्तरु: ।
सारङ्गो नवचक्राङ्ग: केतुमाली सभावन: ॥ ८२

भूतालयो भूतपतिरहोरात्रमनिन्दित: ॥ ८३

वाहिता सर्वभूतानां निलयश्च विभुर्भव: ।
अमोघ: संयतो ह्यश्वो भोजन: प्राणधारण: ॥ ८४

धृतिमान् मतिमान् दक्ष: सत्कृतश्च युगाधिप: ।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरि: ॥ ८५

हिरण्यबाहुश्च तथा गुहापाल: प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रिय: ॥ ८६

गान्धारश्च सुवासश्च तप:सक्तो रतिर्नर: ।
महागीतो महानृत्यो ह्यप्सरोगणसेवित: ॥ ८७

महाकेतुर्महाधातुर्नैकसानुचरश्चल: ।
आवेदनीय आदेश: सर्वगन्धसुखावह: ॥ ८८

तोरणस्तारणो वात: परिधी पतिखेचर: ।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिक: ॥ ८९

नित्य आत्मसहायश्च देवासुरपि: पति: ।
युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वण: ॥ ९०

आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हर: ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथ: ॥ ९१

शिरोहारी विमर्शश्च सर्वलक्षणलक्षित: ।
अक्षश्च रथयोगी च सर्वयोगी महाबल: ॥ ९२

समामान्योऽसमामान्यस्तीर्थदेवो महारथ: ।
निर्जीवो जीवनो मन्त्र: शुभाक्षो बहुकर्कश: ॥ ९३

रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ॥ ९४

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥ ९५

युगरुपो महारुपो महानागहनोऽवधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥ ९६

बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥ ९७

त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः ।
विन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः ॥ ९८

निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् ॥ ९९

मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
ततस्तालः करस्थाली ऊर्ध्वसंहननो महान् ॥ १००

छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुण्डो विरुपो विकृतो दण्डी कुण्डी विकुर्वणः ॥ १०१

हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥ १०२

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ॥ १०३

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ १०४

गभस्तिर्ब्रह्मकृद् ब्रह्मी ब्रह्मविद् ब्राह्मणो गतिः ।
अनन्तरुपो नैकात्मा तिग्मतेजाः स्वयम्भुवः ॥ १०५

ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥ १०६

कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीधृदुमाधवः ॥ १०७

वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥ १०८

पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥ १०९

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः ॥ ११०

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ॥ १११

कलाः काष्ठा लवा मात्रा मुहुर्ताहःक्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः ॥ ११२

सदसद् व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ ११३

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ ११४

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ ११५

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥ ११६

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः ॥ ११७

उद्भित त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥ ११८

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥ ११९

गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रु राजराजो निरामयः ॥ १२०

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥ १२१

स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ॥ १२२

व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ॥ १२३

॥ इति शिव सहस्रनाम स्तोत्रम् सम्पूर्णम् ॥

॥ श्री शिव सहस्र नामावली ॥

- **ध्यान**

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलागं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वासनं
विश्वाधं विश्ववन्धं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

- **विनियोग**

अस्य श्री सदाशिव सहस्रनाम स्तोत्र मंत्रस्य नारायण ऋषि:, श्रीसदाशिवो देवता, अनुष्टुप्छंद:, सदाशिवो बीजम्, गौरीशक्ति:, श्रीसदाशिव प्रीत्यर्थं तद्दिव्य सहस्रनामभि: अमुक द्रव्य समर्पणे विनियोग: ॥

- **सहस्रनाम**

1. ॐ स्थिराय नम:
2. ॐ स्थाणवे नम:
3. ॐ प्रभवे नम:
4. ॐ भीमाय नम:
5. ॐ प्रवराय नम:
6. ॐ वरदाय नम:
7. ॐ वराय नम:
8. ॐ सर्वात्मने नम:
9. ॐ सर्वविख्याताय नम:
10. ॐ सर्वस्मै नम:
11. ॐ सर्वकराय नम:
12. ॐ भवाय नम:
13. ॐ जटिने नम:
14. ॐ चर्मिणे नम:
15. ॐ शिखण्डिने नम:
16. ॐ सर्वाङ्गाय नम:
17. ॐ सर्वभावनाय नम:
18. ॐ हराय नम:
19. ॐ हरिणाक्षाय नम:
20. ॐ सर्वभूतहराय नम:
21. ॐ प्रभवे नम:
22. ॐ प्रवृत्तये नम:
23. ॐ निवृत्तये नम:
24. ॐ नियताय नम:
25. ॐ शाश्वताय नम:
26. ॐ ध्रुवाय नम:
27. ॐ श्मशानवासिने नम:
28. ॐ भगवते नम:
29. ॐ खचराय नम:
30. ॐ गोचराय नम:
31. ॐ अर्दनाय नम:
32. ॐ अभिवाद्याय नम:
33. ॐ महाकर्मणे नम:
34. ॐ तपस्विने नम:
35. ॐ भूतभावनाय नम:
36. ॐ उन्मत्तवेषप्रच्छन्नाय नम:
37. ॐ सर्वलोकप्रजापतये नम:
38. ॐ महारूपाय नम:
39. ॐ महाकायाय नम:
40. ॐ वृषरूपाय नम:
41. ॐ महायशसे नम:
42. ॐ महात्मने नम:
43. ॐ सर्वभूतात्मने नम:
44. ॐ विश्वरूपाय नम:
45. ॐ महाहणवे नम:
46. ॐ लोकपालाय नम:
47. ॐ अन्तर्हितत्मने नम:
48. ॐ प्रसादाय नम:
49. ॐ हयगर्धभये नम:
50. ॐ पवित्राय नम:
51. ॐ महते नम:
52. ॐ नियमाय नम:
53. ॐ नियमाश्रिताय नम:
54. ॐ सर्वकर्मणे नम:
55. ॐ स्वयंभूताय नम:
56. ॐ आदये नम:
57. ॐ आदिकराय नम:
58. ॐ निधये नम:
59. ॐ सहस्राक्षाय नम:
60. ॐ विशालाक्षाय नम:
61. ॐ सोमाय नम:
62. ॐ नक्षत्रसाधकाय नम:
63. ॐ चन्द्राय नम:
64. ॐ सूर्याय नम:
65. ॐ शनये नम:
66. ॐ केतवे नम:
67. ॐ ग्रहाय नम:
68. ॐ ग्रहपतये नम:
69. ॐ वराय नम:
70. ॐ अत्रये नम:
71. ॐ अत्र्या नमस्कर्त्रे नम:
72. ॐ मृगबाणार्पणाय नम:
73. ॐ अनघाय नम:
74. ॐ महातपसे नम:
75. ॐ घोरतपसे नम:

76. ॐ अदीनाय नमः
77. ॐ दीनसाधकाय नमः
78. ॐ संवत्सरकराय नमः
79. ॐ मन्त्राय नमः
80. ॐ प्रमाणाय नमः
81. ॐ परमायतपसे नमः
82. ॐ योगिने नमः
83. ॐ योज्याय नमः
84. ॐ महाबीजाय नमः
85. ॐ महारेतसे नमः
86. ॐ महाबलाय नमः
87. ॐ सुवर्णरेतसे नमः
88. ॐ सर्वज्ञाय नमः
89. ॐ सुबीजाय नमः
90. ॐ बीजवाहनाय नमः
91. ॐ दशबाहवे नमः
92. ॐ अनिमिशाय नमः
93. ॐ नीलकण्ठाय नमः
94. ॐ उमापतये नमः
95. ॐ विश्वरूपाय नमः
96. ॐ स्वयंश्रेष्ठाय नमः
97. ॐ बलवीराय नमः
98. ॐ अबलाय नमः
99. ॐ गणाय नमः
100. ॐ गणकर्त्रे नमः
101. ॐ गणपतये नमः
102. ॐ दिग्वाससे नमः
103. ॐ कामाय नमः
104. ॐ मन्त्रविदे नमः
105. ॐ परमाय नमः
106. ॐ मन्त्राय नमः
107. ॐ सर्वभावकराय नमः
108. ॐ हराय नमः
109. ॐ कमंडलुधराय नमः
110. ॐ धन्विने नमः
111. ॐ बाणहस्ताय नमः
112. ॐ कपालवते नमः
113. ॐ अशनिने नमः
114. ॐ शतघ्निने नमः
115. ॐ खड्गिने नमः
116. ॐ पट्टिशिने नमः
117. ॐ आयुधिने नमः
118. ॐ महते नमः
119. ॐ स्रुवहस्ताय नमः
120. ॐ सुरूपाय नमः
121. ॐ तेजसे नमः
122. ॐ तेजस्कर निधये नमः
123. ॐ उष्णीषिणे नमः
124. ॐ सुवक्त्राय नमः
125. ॐ उदग्राय नमः
126. ॐ विनताय नमः
127. ॐ दीर्घाय नमः
128. ॐ हरिकेशाय नमः
129. ॐ सुतीर्थाय नमः
130. ॐ कृष्णाय नमः
131. ॐ शृगालरूपाय नमः
132. ॐ सिद्धार्थाय नमः
133. ॐ मुण्डाय नमः
134. ॐ सर्वशुभंकराय नमः
135. ॐ अजाय नमः
136. ॐ बहुरूपाय नमः
137. ॐ गन्धधारिणे नमः
138. ॐ कपर्दिने नमः
139. ॐ उर्ध्वरेतसे नमः
140. ॐ ऊर्ध्वलिंगाय नमः
141. ॐ ऊर्ध्वशायिने नमः
142. ॐ नभःस्थलाय नमः
143. ॐ त्रिजटिने नमः
144. ॐ चीरवाससे नमः
145. ॐ रुद्राय नमः
146. ॐ सेनापतये नमः
147. ॐ विभवे नमः
148. ॐ अहश्चराय नमः
149. ॐ नक्तंचराय नमः
150. ॐ तिग्ममन्यवे नमः
151. ॐ सुवर्चसाय नमः
152. ॐ गजघ्ने नमः
153. ॐ दैत्यघ्ने नमः
154. ॐ कालाय नमः
155. ॐ लोकधात्रे नमः
156. ॐ गुणाकराय नमः
157. ॐ सिंहशार्दूलरूपाय नमः
158. ॐ आर्द्रचर्माम्बरावृताय नमः
159. ॐ कालयोगिने नमः
160. ॐ महानादाय नमः
161. ॐ सर्वकामाय नमः
162. ॐ चतुष्पथाय नमः
163. ॐ निशाचराय नमः
164. ॐ प्रेतचारिणे नमः
165. ॐ भूतचारिणे नमः
166. ॐ महेश्वराय नमः
167. ॐ बहुभूताय नमः
168. ॐ बहुधराय नमः
169. ॐ स्वर्भानवे नमः
170. ॐ अमिताय नमः
171. ॐ गतये नमः
172. ॐ नृत्यप्रियाय नमः
173. ॐ नित्यनर्ताय नमः
174. ॐ नर्तकाय नमः
175. ॐ सर्वलालसाय नमः
176. ॐ घोराय नमः
177. ॐ महातपसे नमः
178. ॐ पाशाय नमः
179. ॐ नित्याय नमः
180. ॐ गिरिरुहाय नमः
181. ॐ नभसे नमः
182. ॐ सहस्रहस्ताय नमः
183. ॐ विजयाय नमः
184. ॐ व्यवसायाय नमः
185. ॐ अतन्द्रिताय नमः
186. ॐ अधर्षणाय नमः

187. ॐ धर्षणात्मने नमः
188. ॐ यज्ञघ्ने नमः
189. ॐ कामनाशकाय नमः
190. ॐ दक्ष्यागपहारिणे नमः
191. ॐ सुसहाय नमः
192. ॐ मध्यमाय नमः
193. ॐ तेजोपहारिणे नमः
194. ॐ बलघ्ने नमः
195. ॐ मुदिताय नमः
196. ॐ अर्थाय नमः
197. ॐ अजिताय नमः
198. ॐ अवराय नमः
199. ॐ गम्भीरघोषय नमः
200. ॐ गम्भीराय नमः
201. ॐ गम्भीरबलवाहनाय नमः
202. ॐ न्यग्रोधरूपाय नमः
203. ॐ न्यग्रोधाय नमः
204. ॐ वृक्षकर्णस्थिताय नमः
205. ॐ विभवे नमः
206. ॐ सुतीक्ष्णदशनाय नमः
207. ॐ महाकायाय नमः
208. ॐ महाननाय नमः
209. ॐ विश्वक्सेनाय नमः
210. ॐ हरये नमः
211. ॐ यज्ञाय नमः
212. ॐ संयुगापीडवाहनाय नमः
213. ॐ तीक्ष्णातापाय नमः
214. ॐ हर्यश्वाय नमः
215. ॐ सहायाय नमः
216. ॐ कर्मकालविदे नमः
217. ॐ विष्णुप्रसादिताय नमः
218. ॐ यज्ञाय नमः
219. ॐ समुद्राय नमः
220. ॐ बडवामुखाय नमः
221. ॐ हुताशनसहायाय नमः
222. ॐ प्रशान्तात्मने नमः
223. ॐ हुताशनाय नमः
224. ॐ उग्रतेजसे नमः
225. ॐ महातेजसे नमः
226. ॐ जन्याय नमः
227. ॐ विजयकालविदे नमः
228. ॐ ज्योतिषामयनाय नमः
229. ॐ सिद्धये नमः
230. ॐ सर्वविग्रहाय नमः
231. ॐ शिखिने नमः
232. ॐ मुण्डिने नमः
233. ॐ जटिने नमः
234. ॐ ज्वलिने नमः
235. ॐ मूर्तिजाय नमः
236. ॐ मूर्धजाय नमः
237. ॐ बलिने नमः
238. ॐ वेणविने नमः
239. ॐ पणविने नमः
240. ॐ तालिने नमः
241. ॐ खलिने नमः
242. ॐ कालकटङ्कटाय नमः
243. ॐ नक्षत्रविग्रहमतये नमः
244. ॐ गुणबुद्धये नमः
245. ॐ लयाय नमः
246. ॐ अगमाय नमः
247. ॐ प्रजापतये नमः
248. ॐ विश्वबाहवे नमः
249. ॐ विभागाय नमः
250. ॐ सर्वगाय नमः
251. ॐ अमुखाय नमः
252. ॐ विमोचनाय नमः
253. ॐ सुसरणाय नमः
254. ॐ हिरण्यकवचोद्भवाय नमः
255. ॐ मेढ्रजाय नमः
256. ॐ बलचारिणे नमः
257. ॐ महीचारिणे नमः
258. ॐ सुताय नमः
259. ॐ सर्वतूर्यविनोदिने नमः
260. ॐ सर्वतोद्यपरिग्रहाय नमः
261. ॐ व्यालरूपाय नमः
262. ॐ गुहावासिने नमः
263. ॐ गुहाय नमः
264. ॐ मालिने नमः
265. ॐ तरङ्गविदे नमः
266. ॐ त्रिदशाय नमः
267. ॐ त्रिकालधृते नमः
268. ॐ कर्मसर्वबन्धविमोचनाय नमः
269. ॐ असुरेन्द्राणांबन्धनाय नमः
270. ॐ युधि शत्रुविनाशिने नमः
271. ॐ सांख्यप्रसादाय नमः
272. ॐ दुर्वाससे नमः
273. ॐ सर्वसाधुनिषेविताय नमः
274. ॐ प्रस्कन्दनाय नमः
275. ॐ यज्ञविभागविदे नमः
276. ॐ अतुल्याय नमः
277. ॐ यज्ञविभागविदे नमः
278. ॐ सर्ववासाय नमः
279. ॐ सर्वचारिणे नमः
280. ॐ दुर्वाससे नमः
281. ॐ वासवाय नमः
282. ॐ अमराय नमः
283. ॐ हैमाय नमः
284. ॐ हेमकराय नमः
285. ॐ धरोत्तमाय नमः
286. ॐ लोहिताक्षाय नमः
287. ॐ माक्षाय नमः
288. ॐ विजयक्षाय नमः
289. ॐ विशारदाय नमः
290. ॐ सर्वकामदाय नमः
291. ॐ सर्वकालप्रसादाय नमः
292. ॐ सुबलाय नमः
293. ॐ बलरूपधृषे नमः
294. ॐ संग्रहाय नमः
295. ॐ निग्रहाय नमः
296. ॐ कर्त्रे नमः
297. ॐ सर्पचीरनिवासाय नमः

298. ॐ मुख्याय नमः
299. ॐ अमुख्याय नमः
300. ॐ देहाय नमः
301. ॐ काहलये नमः
302. ॐ सर्वकामवराय नमः
303. ॐ सर्वदाय नमः
304. ॐ सर्वतोमुखाय नमः
305. ॐ आकाशनिर्विरूपाय नमः
306. ॐ निपातिने नमः
307. ॐ अवशाय नमः
308. ॐ खगाय नमः
309. ॐ रौद्ररूपाय नमः
310. ॐ अंशवे नमः
311. ॐ आदित्याय नमः
312. ॐ बहुरश्मये नमः
313. ॐ सुवर्चसिने नमः
314. ॐ वसुवेगाय नमः
315. ॐ महावेगाय नमः
316. ॐ मनोवेगाय नमः
317. ॐ निशाचराय नमः
318. ॐ सर्ववासिने नमः
319. ॐ श्रियावासिने नमः
320. ॐ उपदेशकराय नमः
321. ॐ अकराय नमः
322. ॐ मुनये नमः
323. ॐ आत्मनिरालोकाय नमः
324. ॐ सम्भग्नाय नमः
325. ॐ सहस्रदाय नमः
326. ॐ पक्षिणे नमः
327. ॐ पक्षरूपाय नमः
328. ॐ अतिदीप्ताय नमः
329. ॐ विशाम्पतये नमः
330. ॐ उन्मादाय नमः
331. ॐ मदनाय नमः
332. ॐ कामाय नमः
333. ॐ अश्वत्थाय नमः
334. ॐ अर्थकराय नमः
335. ॐ यशसे नमः
336. ॐ वामदेवाय नमः
337. ॐ वामाय नमः
338. ॐ प्राचे नमः
339. ॐ दक्षिणाय नमः
340. ॐ वामनाय नमः
341. ॐ सिद्धयोगिने नमः
342. ॐ महर्शये नमः
343. ॐ सिद्धार्थाय नमः
344. ॐ सिद्धसाधकाय नमः
345. ॐ भिक्षवे नमः
346. ॐ भिक्षुरूपाय नमः
347. ॐ विपणाय नमः
348. ॐ मृदवे नमः
349. ॐ अव्ययाय नमः
350. ॐ महासेनाय नमः
351. ॐ विशाखाय नमः
352. ॐ षष्टिभागाय नमः
353. ॐ गवां पतये नमः
354. ॐ वज्रहस्ताय नमः
355. ॐ विष्कम्भिने नमः
356. ॐ चमूस्तम्भनाय नमः
357. ॐ वृत्तावृत्तकराय नमः
358. ॐ तालाय नमः
359. ॐ मधवे नमः
360. ॐ मधुकलोचनाय नमः
361. ॐ वाचस्पत्याय नमः
362. ॐ वाजसेनाय नमः
363. ॐ नित्यमाश्रितपूजिताय नमः
364. ॐ ब्रह्मचारिणे नमः
365. ॐ लोकचारिणे नमः
366. ॐ सर्वचारिणे नमः
367. ॐ विचारविदे नमः
368. ॐ ईशानाय नमः
369. ॐ ईश्वराय नमः
370. ॐ कालाय नमः
371. ॐ निशाचारिणे नमः
372. ॐ पिनाकभृते नमः
373. ॐ निमित्तस्थाय नमः
374. ॐ निमित्ताय नमः
375. ॐ नन्दये नमः
376. ॐ नन्दिकराय नमः
377. ॐ हरये नमः
378. ॐ नन्दीश्वराय नमः
379. ॐ नन्दिने नमः
380. ॐ नन्दनाय नमः
381. ॐ नन्दिवर्धनाय नमः
382. ॐ भगहारिणे नमः
383. ॐ निहन्त्रे नमः
384. ॐ कलाय नमः
385. ॐ ब्रह्मणे नमः
386. ॐ पितामहाय नमः
387. ॐ चतुर्मुखाय नमः
388. ॐ महालिंगाय नमः
389. ॐ चारुलिंगाय नमः
390. ॐ लिंगाध्याक्षाय नमः
391. ॐ सुराध्यक्षाय नमः
392. ॐ योगाध्यक्षाय नमः
393. ॐ युगावहाय नमः
394. ॐ बीजाध्यक्षाय नमः
395. ॐ बीजकर्त्रे नमः
396. ॐ अध्यात्मानुगताय नमः
397. ॐ बलाय नमः
398. ॐ इतिहासाय नमः
399. ॐ संकल्पाय नमः
400. ॐ गौतमाय नमः
401. ॐ निशाकराय नमः
402. ॐ दम्भाय नमः
403. ॐ अदम्भाय नमः
404. ॐ वैदम्भाय नमः
405. ॐ वश्याय नमः
406. ॐ वशकराय नमः
407. ॐ कलये नमः
408. ॐ लोककर्त्रे नमः

409. ॐ पशुपतये नमः
410. ॐ महाकर्त्रे नमः
411. ॐ अनौषधाय नमः
412. ॐ अक्षराय नमः
413. ॐ परब्रह्मणे नमः
414. ॐ बलवते नमः
415. ॐ शक्राय नमः
416. ॐ नितये नमः
417. ॐ अनितये नमः
418. ॐ शुद्धात्मने नमः
419. ॐ मान्याय नमः
420. ॐ शुद्धाय नमः
421. ॐ गतागताय नमः
422. ॐ बहुप्रसादाय नमः
423. ॐ सुस्वप्नाय नमः
424. ॐ दर्पणाय नमः
425. ॐ अमित्रजिते नमः
426. ॐ वेदकाराय नमः
427. ॐ मन्त्रकाराय नमः
428. ॐ विदुषे नमः
429. ॐ समरमर्दनाय नमः
430. ॐ महामेघनिवासिने नमः
431. ॐ महाघोराय नमः
432. ॐ वशिने नमः
433. ॐ कराय नमः
434. ॐ अग्निज्वालाय नमः
435. ॐ महाज्वालाय नमः
436. ॐ अतिधूम्राय नमः
437. ॐ हुताय नमः
438. ॐ हविषे नमः
439. ॐ वृषणाय नमः
440. ॐ शङ्कराय नमः
441. ॐ नित्यं वर्चस्विने नमः
442. ॐ धूमकेतनाय नमः
443. ॐ नीलाय नमः
444. ॐ अङ्गलुब्धाय नमः
445. ॐ शोभनाय नमः
446. ॐ निरवग्रहाय नमः
447. ॐ स्वस्तिदाय नमः
448. ॐ स्वस्तिभावाय नमः
449. ॐ भागिने नमः
450. ॐ भागकराय नमः
451. ॐ लघवे नमः
452. ॐ उत्सङ्गाय नमः
453. ॐ महाङ्गाय नमः
454. ॐ महागर्भपरायणाय नमः
455. ॐ कृष्णवर्णाय नमः
456. ॐ सुवर्णाय नमः
457. ॐ सर्वदेहिनां इन्द्रियाय नमः
458. ॐ महापादाय नमः
459. ॐ महाहस्ताय नमः
460. ॐ महाकायाय नमः
461. ॐ महायशसे नमः
462. ॐ महामूर्ध्ने नमः
463. ॐ महामात्राय नमः
464. ॐ महानेत्राय नमः
465. ॐ निशालयाय नमः
466. ॐ महान्तकाय नमः
467. ॐ महाकर्णाय नमः
468. ॐ महोष्ठाय नमः
469. ॐ महाहनवे नमः
470. ॐ महानासाय नमः
471. ॐ महाकम्बवे नमः
472. ॐ महाग्रीवाय नमः
473. ॐ श्मशानभाजे नमः
474. ॐ महावक्षसे नमः
475. ॐ महोरस्काय नमः
476. ॐ अन्तरात्मने नमः
477. ॐ मृगालयाय नमः
478. ॐ लम्बनाय नमः
479. ॐ लंबितोष्ठाय नमः
480. ॐ महामायाय नमः
481. ॐ पयोनिधये नमः
482. ॐ महादन्ताय नमः
483. ॐ महादंष्ट्राय नमः
484. ॐ महजिह्वाय नमः
485. ॐ महामुखाय नमः
486. ॐ महानखाय नमः
487. ॐ महारोमाय नमः
488. ॐ महाकोशाय नमः
489. ॐ महाजटाय नमः
490. ॐ प्रसन्नाय नमः
491. ॐ प्रसादाय नमः
492. ॐ प्रत्ययाय नमः
493. ॐ गिरिसाधनाय नमः
494. ॐ स्नेहनाय नमः
495. ॐ अस्नेहनाय नमः
496. ॐ अजिताय नमः
497. ॐ महामुनये नमः
498. ॐ वृक्षाकाराय नमः
499. ॐ वृक्षकेतवे नमः
500. ॐ अनलाय नमः
501. ॐ वायुवाहनाय नमः
502. ॐ गण्डलिने नमः
503. ॐ मेरुधाम्ने नमः
504. ॐ देवाधिपतये नमः
505. ॐ अथर्वशीर्षाय नमः
506. ॐ सामास्याय नमः
507. ॐ ऋक्सहस्रामितेक्षणाय नमः
508. ॐ यजुः पाद भुजाय नमः
509. ॐ गुह्याय नमः
510. ॐ प्रकाशाय नमः
511. ॐ जङ्गमाय नमः
512. ॐ अमोघार्थाय नमः
513. ॐ प्रसादाय नमः
514. ॐ अभिगम्याय नमः
515. ॐ सुदर्शनाय नमः
516. ॐ उपकाराय नमः
517. ॐ प्रियाय नमः
518. ॐ सर्वाय नमः
519. ॐ कनकाय नमः

520. ॐ कञ्चनच्छवये नमः
521. ॐ नाभये नमः
522. ॐ नन्दिकराय नमः
523. ॐ भावाय नमः
524. ॐ पुष्करस्थापतये नमः
525. ॐ स्थिराय नमः
526. ॐ द्वादशाय नमः
527. ॐ त्रासनाय नमः
528. ॐ आद्याय नमः
529. ॐ यज्ञाय नमः
530. ॐ यज्ञसमाहिताय नमः
531. ॐ नक्तं नमः
532. ॐ कलये नमः
533. ॐ कालाय नमः
534. ॐ मकराय नमः
535. ॐ कालपूजिताय नमः
536. ॐ सगणाय नमः
537. ॐ गणकाराय नमः
538. ॐ भूतवाहनसारथये नमः
539. ॐ भस्मशयाय नमः
540. ॐ भस्मगोप्त्रे नमः
541. ॐ भस्मभूताय नमः
542. ॐ तरवे नमः
543. ॐ गणाय नमः
544. ॐ लोकपालाय नमः
545. ॐ अलोकाय नमः
546. ॐ महात्मने नमः
547. ॐ सर्वपूजिताय नमः
548. ॐ शुक्लाय नमः
549. ॐ त्रिशुक्लाय नमः
550. ॐ सम्पन्नाय नमः
551. ॐ शुचये नमः
552. ॐ भूतनिषेविताय नमः
553. ॐ आश्रमस्थाय नमः
554. ॐ क्रियावस्थाय नमः
555. ॐ विश्वकर्ममतये नमः
556. ॐ वराय नमः
557. ॐ विशालशाखाय नमः
558. ॐ ताम्रोष्ठाय नमः
559. ॐ अम्बुजाय नमः
560. ॐ सुनिश्चलाय नमः
561. ॐ कपिलाय नमः
562. ॐ कपिशाय नमः
563. ॐ शुक्लाय नमः
564. ॐ अयुशे नमः
565. ॐ पराय नमः
566. ॐ अपराय नमः
567. ॐ गन्धर्वाय नमः
568. ॐ अदितये नमः
569. ॐ तार्क्ष्याय नमः
570. ॐ सुविज्ञेयाय नमः
571. ॐ सुशारदाय नमः
572. ॐ परश्वधायुधाय नमः
573. ॐ देवाय नमः
574. ॐ अनुकारिणे नमः
575. ॐ सुबान्धवाय नमः
576. ॐ तुम्बवीणाय नमः
577. ॐ महाक्रोधाय नमः
578. ॐ ऊर्ध्वरेतसे नमः
579. ॐ जलेशयाय नमः
580. ॐ उग्राय नमः
581. ॐ वंशकराय नमः
582. ॐ वंशाय नमः
583. ॐ वंशानादाय नमः
584. ॐ अनिन्दिताय नमः
585. ॐ सर्वांगरूपाय नमः
586. ॐ मायाविने नमः
587. ॐ सुहृदे नमः
588. ॐ अनिलाय नमः
589. ॐ अनलाय नमः
590. ॐ बन्धनाय नमः
591. ॐ ऊँ बन्धकर्त्रे नमः
592. ॐ सुबन्धनविमोचनाय नमः
593. ॐ सयज्ञारये नमः
594. ॐ सकामारये नमः
595. ॐ महाद्रष्टाय नमः
596. ॐ महायुधाय नमः
597. ॐ बहुधानिन्दिताय नमः
598. ॐ शर्वाय नमः
599. ॐ शंकराय नमः
600. ॐ शंकराय नमः
601. ॐ अधनाय नमः
602. ॐ अमरेशाय नमः
603. ॐ महादेवाय नमः
604. ॐ विश्वदेवाय नमः
605. ॐ सुरारिघ्ने नमः
606. ॐ अहिर्बुद्धिन्याय नमः
607. ॐ अनिलाभाय नमः
608. ॐ चेकिताय नमः
609. ॐ हविषे नमः
610. ॐ अजैकपदे नमः
611. ॐ कपालिने नमः
612. ॐ त्रिशंकवे नमः
613. ॐ अजिताय नमः
614. ॐ शिवाय नमः
615. ॐ धन्वंतरये नमः
616. ॐ धूमकेतवे नमः
617. ॐ स्कन्दाय नमः
618. ॐ वैश्रवणाय नमः
619. ॐ धात्रे नमः
620. ॐ शक्राय नमः
621. ॐ विष्णवे नमः
622. ॐ भिन्नाय नमः
623. ॐ त्वष्ट्रे नमः
624. ॐ ध्रुवाय नमः
625. ॐ धराय नमः
626. ॐ प्रभावाय नमः
627. ॐ सर्वगाय नमः
628. ॐ अर्यम्णे नमः
629. ॐ सवित्रे नमः
630. ॐ रवये नमः

631. ॐ उषंगवे नमः
632. ॐ विधात्रे नमः
633. ॐ मांधात्रे नमः
634. ॐ भूतभावनाय नमः
635. ॐ विभवे नमः
636. ॐ वर्णविभाविने नमः
637. ॐ सर्वकामगुणवहाय नमः
638. ॐ पद्मनाभाय नमः
639. ॐ महागर्भाय नमः
640. ॐ चन्द्रवक्त्राय नमः
641. ॐ अनिलाय नमः
642. ॐ अनलाय नमः
643. ॐ बलवते नमः
644. ॐ उपशांताय नमः
645. ॐ पुराणाय नमः
646. ॐ पुण्यचञ्चवे नमः
647. ॐ इत्यै नमः
648. ॐ कुरूकर्त्रे नमः
649. ॐ कुरूवासिने नमः
650. ॐ पुरूहुताय नमः
651. ॐ गुणौषधाय नमः
652. ॐ सर्वाशयाय नमः
653. ॐ दर्भचारिणे नमः
654. ॐ सर्वप्राणिपतये नमः
655. ॐ देवदेवाय नमः
656. ॐ सुखासक्ताय नमः
657. ॐ सदसते नमः
658. ॐ सर्वरत्नविदे नमः
659. ॐ कैलाशगिरिवासिने नमः
660. ॐ हिमवद्गिरिसंश्रयाय नमः
661. ॐ कूलहारिणे नमः
662. ॐ कुलकर्त्रे नमः
663. ॐ बहुविद्याय नमः
664. ॐ बहुप्रदाय नमः
665. ॐ वणिजाय नमः
666. ॐ वर्धकिने नमः
667. ॐ वृक्षाय नमः
668. ॐ बकुलाय नमः
669. ॐ चंदनाय नमः
670. ॐ छदाय नमः
671. ॐ सारग्रीवाय नमः
672. ॐ महाजत्रवे नमः
673. ॐ अलोलाय नमः
674. ॐ महौषधाय नमः
675. ॐ सिद्धार्थकारिणे नमः
676. ॐ छन्दोव्याकरणोत्तर-
677. ॐ सिद्धार्थाय नमः
678. ॐ सिंहनादाय नमः
679. ॐ सिंहदंष्ट्राय नमः
680. ॐ सिंहगाय नमः
681. ॐ सिंहवाहनाय नमः
682. ॐ प्रभावात्मने नमः
683. ॐ जगत्कालस्थानाय नमः
684. ॐ लोकहिताय नमः
685. ॐ तरवे नमः
686. ॐ सारंगाय नमः
687. ॐ नवचक्रांगाय नमः
688. ॐ केतुमालिने नमः
689. ॐ सभायनाय नमः
690. ॐ भूतालयाय नमः
691. ॐ भूतपतये नमः
692. ॐ अहोरात्राय नमः
693. ॐ अनिन्दिताय नमः
694. ॐ सर्वभूतवाहित्रे नमः
695. ॐ सर्वभूतनिलयाय नमः
696. ॐ विभवे नमः
697. ॐ भवाय नमः
698. ॐ अमोघाय नमः
699. ॐ संयताय नमः
700. ॐ अश्वाय नमः
701. ॐ भोजनाय नमः
702. ॐ प्राणधारणाय नमः
703. ॐ धृतिमते नम
704. ॐ मतिमते नमः
705. ॐ दक्षाय नमः
706. ॐ सत्कृयाय नमः
707. ॐ युगाधिपाय नमः
708. ॐ गोपालाय नमः
709. ॐ गोपतये नमः
710. ॐ ग्रामाय नमः
711. ॐ गोचर्मवसनाय नमः
712. ॐ हरये नमः
713. ॐ हिरण्यबाहवे नमः
714. ॐ प्रवेशिनांगुहापालाय नमः
715. ॐ प्रकृष्टारये नमः
716. ॐ महाहर्षाय नमः
717. ॐ जितकामाय नमः
718. ॐ जितेन्द्रियाय नमः
719. ॐ गांधाराय नमः
720. ॐ सुवासाय नमः
721. ॐ तपःसक्ताय नमः
722. ॐ रतये नमः
723. ॐ नराय नमः
724. ॐ महागीताय नमः
725. ॐ महानृत्याय नमः
726. ॐ अप्सरोगणसेविताय नमः
727. ॐ महाकेतवे नमः
728. ॐ महाधातवे नमः
729. ॐ नैकसानुचराय नमः
730. ॐ चलाय नमः
731. ॐ आवेदनीयाय नमः
732. ॐ आदेशाय नमः
733. ॐ सर्वगंधसुखावहाय नमः
734. ॐ तोरणाय नमः
735. ॐ तारणाय नमः
736. ॐ वाताय नमः
737. ॐ परिधिने नमः
738. ॐ पतिखेचराय नमः
739. ॐ संयोगवर्धनाय नमः
740. ॐ गुणाधिकवृधाय नमः
741. ॐ अधिवृद्धाय नमः

742. ॐ नित्यात्मसहायाय नमः
743. ॐ ऊँ देवासुरपतये नमः
744. ॐ पतये नमः
745. ॐ युक्ताय नमः
746. ॐ युक्तबाहवे नमः
747. ॐ दिविसुपर्वदेवाय नमः
748. ॐ आषाढाय नमः
749. ॐ सुषाढ़ाय नमः
750. ॐ ध्रुवाय नमः
751. ॐ हरिणाय नमः
752. ॐ हराय नमः
753. ॐ आवर्तमानवपुषे नमः
754. ॐ वसुश्रेष्ठाय नमः
755. ॐ महापथाय नमः
756. ॐ विमर्षशिरोहारिणे नमः
757. ॐ सर्वलक्षणलक्षिताय नमः
758. ॐ अक्षरथयोगिने नमः
759. ॐ सर्वयोगिने नमः
760. ॐ महाबलाय नमः
761. ॐ समाम्नायाय नमः
762. ॐ असाम्नायाय नमः
763. ॐ तीर्थदेवाय नमः
764. ॐ महारथाय नमः
765. ॐ निर्जीवाय नमः
766. ॐ जीवनाय नमः
767. ॐ मंत्राय नमः
768. ॐ शुभाक्षाय नमः
769. ॐ बहुकर्कशाय नमः
770. ॐ रत्नभूताय नमः
771. ॐ रत्नांगाय नमः
772. ॐ महार्णवनिपानविदे नमः
773. ॐ मूलाय नमः
774. ॐ त्रिशुलाय नमः
775. ॐ अमृताय नमः
776. ॐ व्यक्ताव्यक्ताय नमः
777. ॐ तपोनिधये नमः
778. ॐ आरोहणाय नमः
779. ॐ अधिरोहाय नमः
780. ॐ शीलधारिणे नमः
781. ॐ महायशसे नमः
782. ॐ सेनाकल्पाय नमः
783. ॐ महाकल्पाय नमः
784. ॐ योगाय नमः
785. ॐ युगकराय नमः
786. ॐ हरये नमः
787. ॐ युगरूपाय नमः
788. ॐ महारूपाय नमः
789. ॐ महागहनाय नमः
790. ॐ वधाय नमः
791. ॐ न्यायनिर्वपणाय नमः
792. ॐ पादाय नमः
793. ॐ पण्डिताय नमः
794. ॐ अचलोपमाय नमः
795. ॐ बहुमालाय नमः
796. ॐ महामालाय नमः
797. ॐ शशिहरसुलोचनाय नमः
798. ॐ विस्तारलवणकूपाय नमः
799. ॐ त्रियुगाय नमः
800. ॐ सफलोदयाय नमः
801. ॐ त्रिनेत्राय नमः
802. ॐ विषमांगाय नमः
803. ॐ मणिविद्धाय नमः
804. ॐ जटाधराय नमः
805. ॐ ऊँ बिन्दवे नमः
806. ॐ विसर्गाय नमः
807. ॐ सुमुखाय नमः
808. ॐ शराय नमः
809. ॐ सर्वायुधाय नमः
810. ॐ सहाय नमः
811. ॐ निवेदनाय नमः
812. ॐ सुखाजाताय नमः
813. ॐ सुगन्धराय नमः
814. ॐ महाधनुषे नमः
815. ॐ गंधपालिभगवते नमः
816. ॐ सर्वकर्मोत्थानाय नमः
817. ॐ मंथानबहुलबाहवे नमः
818. ॐ सकलाय नमः
819. ॐ सर्वलोचनाय नमः
820. ॐ तलस्तालाय नमः
821. ॐ करस्थालिने नमः
822. ॐ ऊर्ध्वसंनहनाय नमः
823. ॐ महते नमः
824. ॐ छत्राय नमः
825. ॐ सुच्छत्राय नमः
826. ॐ विख्यातलोकाय नमः
827. ॐ सर्वाश्रयक्रमाय नमः
828. ॐ मुण्डाय नमः
829. ॐ विरूपाय नमः
830. ॐ विकृताय नमः
831. ॐ दण्डिने नमः
832. ॐ कुण्डिने नमः
833. ॐ विकुर्वाणाय नमः
834. ॐ हर्यक्षाय नमः
835. ॐ ककुभाय नमः
836. ॐ वज्रिणे नमः
837. ॐ शतजिह्वाय नमः
838. ॐ सहस्रपदे नमः
839. ॐ सहस्त्रमूर्धे नमः
840. ॐ देवेन्द्राय नमः
841. ॐ सर्वदेवमयाय नमः
842. ॐ गुरवे नमः
843. ॐ सहस्रबाहवे नमः
844. ॐ सर्वांगाय नमः
845. ॐ शरण्याय नमः
846. ॐ सर्वलोककृते नमः
847. ॐ पवित्राय नमः
848. ॐ त्रिककुन्मंत्राय नमः
849. ॐ कनिष्ठाय नमः
850. ॐ कृष्णपिंगलाय नमः
851. ॐ ब्रह्मदण्डविनिर्मात्रे नमः
852. ॐ शतघ्नीपाशशक्तिमते नमः

853. ॐ पद्मगर्भाय नमः
854. ॐ महागर्भाय नमः
855. ॐ ब्रह्मगर्भाय नमः
856. ॐ जलोद्भावाय नमः
857. ॐ गभस्तये नमः
858. ॐ ब्रह्मकृते नमः
859. ॐ ब्रह्मिणे नमः
860. ॐ ब्रह्मविदे नमः
861. ॐ ब्राह्मणाय नमः
862. ॐ गतये नमः
863. ॐ अनंतरूपाय नमः
864. ॐ नैकात्मने नमः
865. ॐ स्वयंभुवतिग्मतेजसे नमः
866. ॐ उर्ध्वगात्मने नमः
867. ॐ पशुपतये नमः
868. ॐ घातरंहसे नमः
869. ॐ मनोजवाय नमः
870. ॐ चंदनिने नमः
871. ॐ पद्मनालाग्राय नमः
872. ॐ सुरभ्युत्तारणाय नमः
873. ॐ नराय नमः
874. ॐ कर्णिकारमहास्रग्विण नमः
875. ॐ नीलमौलये नमः
876. ॐ पिनाकधृषे नमः
877. ॐ उमापतये नमः
878. ॐ उमाकान्ताय नमः
879. ॐ जाह्नवीधृषे नमः
880. ॐ उमाधवाय नमः
881. ॐ वरवराहाय नमः
882. ॐ वरदाय नमः
883. ॐ वरेण्याय नमः
884. ॐ सुमहास्वनाय नमः
885. ॐ महाप्रसादाय नमः
886. ॐ दमनाय नमः
887. ॐ शत्रुघ्ने नमः
888. ॐ श्वेतपिंगलाय नमः
889. ॐ पीतात्मने नमः
890. ॐ परमात्मने नमः
891. ॐ प्रयतात्मने नमः
892. ॐ प्रधानधृषे नमः
893. ॐ सर्वपार्श्वमुखाय नमः
894. ॐ त्र्यक्षाय नमः
895. ॐ सर्वसाधारणवराय नमः
896. ॐ चराचरात्मने नमः
897. ॐ सूक्ष्मात्मने नमः
898. ॐ अमृतगोवृषेश्वराय नमः
899. ॐ साध्यर्पये नमः
900. ॐ आदित्यवसवे नमः
901. ॐ विवस्वत्सवित्रमृताय नमः
902. ॐ व्यासाय नमः
903. ॐ सर्गसुसंक्षेपविस्तराय नमः
904. ॐ पर्ययोनराय नमः
905. ॐ ऋतवे नमः
906. ॐ संवत्सराय नमः
907. ॐ मासाय नमः
908. ॐ पक्षाय नमः ।
909. ॐ संख्यासमापनाय नमः
910. ॐ कलायै नमः
911. ॐ काष्ठायै नमः
912. ॐ लवेभ्यो नमः
913. ॐ मात्रेभ्यो नमः
914. ॐ मुहूर्ताहःक्षपाभ्यो नमः
915. ॐ क्षणेभ्यो नमः
916. ॐ विश्वक्षेत्राय नमः
917. ॐ प्रजाबीजाय नमः
918. ॐ लिंगाय नमः
919. ॐ आद्यनिर्गमाय नमः
920. ॐ सते नमः
921. ॐ असते नमः
922. ॐ व्यक्ताय नमः
923. ॐ अव्यक्ताय नमः
924. ॐ पित्रे नमः
925. ॐ मात्रे नमः
926. ॐ पितामहाय नमः
927. ॐ स्वर्गद्वाराय नमः
928. ॐ प्रजाद्वाराय नमः
929. ॐ मोक्षद्वाराय नमः
930. ॐ त्रिविष्टपाय नमः
931. ॐ निर्वाणाय नमः
932. ॐ ह्लादनाय नमः
933. ॐ ब्रह्मलोकाय नमः
934. ॐ परागतये नमः
935. ॐ देवासुरविनिर्मात्रे नमः
936. ॐ देवासुरपरायणाय नमः
937. ॐ देवासुरगुरूवे नमः
938. ॐ देवाय नमः
939. ॐ देवासुरनमस्कृताय नमः
940. ॐ देवासुरमहामात्राय नमः
941. ॐ देवासुरगणाश्रयाय नमः
942. ॐ देवासुरगणाध्यक्षाय नमः
943. ॐ देवासुरगणाग्रण्यै नमः
944. ॐ देवातिदेवाय नमः
945. ॐ देवर्षये नमः
946. ॐ देवासुरवरप्रदाय नमः
947. ॐ देवासुरेश्वराय नमः
948. ॐ विश्वाय नमः
949. ॐ देवासुरमहेश्वराय नमः
950. ॐ सर्वदेवमयाय नमः
951. ॐ अचिंत्याय नमः
952. ॐ देवतात्मने नमः
953. ॐ आत्मसंभवाय नमः
954. ॐ उद्भिदे नमः
955. ॐ त्रिविक्रमाय नमः
956. ॐ वैद्याय नमः
957. ॐ विरजाय नमः
958. ॐ नीरजाय नमः
959. ॐ अमराय नमः
960. ॐ इड्याय नमः
961. ॐ हस्तीश्वराय नमः
962. ॐ व्याघ्राय नमः
963. ॐ देवसिंहाय नमः

964. ॐ नरर्षभाय नमः
965. ॐ विबुदाय नमः
966. ॐ अग्रवराय नमः
967. ॐ सूक्ष्माय नमः
968. ॐ सर्वदेवाय नमः
969. ॐ तपोमयाय नमः
970. ॐ सुयुक्ताय नमः
971. ॐ शोभनाय नमः
972. ॐ वज्रिणे नमः
973. ॐ प्रासानां प्रभवाय नमः
974. ॐ अव्ययाय नमः
975. ॐ गुहाय नमः
976. ॐ कान्ताय नमः
977. ॐ निजसर्गाय नमः
978. ॐ पवित्राय नमः
979. ॐ सर्वपावनाय नमः
980. ॐ श्रृंगिणे नमः
981. ॐ श्रृंगप्रियाय नमः
982. ॐ बभ्रवे नमः
983. ॐ राजराजाय नमः
984. ॐ निरामयाय नमः
985. ॐ अभिरामाय नमः
986. ॐ सुरगणाय नमः
987. ॐ विरामाय नमः
988. ॐ सर्वसाधनाय नमः
989. ॐ ललाटाक्षाय नमः
990. ॐ विश्वदेवाय नमः
991. ॐ हरिणाय नमः
992. ॐ ब्रह्मवर्चसे नमः
993. ॐ स्थावरपतये नमः
994. ॐ नियमेन्द्रियवर्धनाय नमः
995. ॐ सिद्धार्थाय नमः
996. ॐ सिद्धभूतार्थाय नमः
997. ॐ अचिन्ताय नमः
998. ॐ सत्यव्रताय नमः
999. ॐ शुचये नमः
1000. ॐ व्रताधिपाय नमः
1001. ॐ पराय नमः
1002. ॐ ब्रह्मणे नमः
1003. ॐ भक्तानांपरमागतये नमः
1004. ॐ विमुक्ताय नमः
1005. ॐ मुक्ततेजसे नमः
1006. ॐ श्रीमते नमः
1007. ॐ श्रीवर्धनाय नमः
1008. ॐ श्री जगते नमः

॥ शिवजी की आरती ॥

जय शिव ओंकारा, हर शिव ओंकारा।
ब्रम्हा विष्णु सदाशिव, अर्द्धांगी धारा ॥ १॥ ॐ जय शिव ओंकारा.....

एकानन, चतुरानन, पंचांनन राजे।
हंसासंन, गरुड़ासन, वृषवाहन साजे ॥ २॥ ॐ जय शिव ओंकारा.....

दोय भुज चार चतुर्भज, दस भुज अति सोहें।
तीनों रुप निरखता, त्रिभुवन जन मोहें ॥ ३॥ ॐ जय शिव ओंकारा.....

अक्षमाला, बनमाला, रुण्ड़माला धारी।
चंदन, मृदमग चन्दा, भाले शशिधारी ॥ ४॥ ॐ जय शिव ओंकारा.....

श्वेताम्बर, पीताम्बर, बाघाम्बर अंगें।
सनकादिक, ब्रम्हादिक, भूतादिक संगें ॥ ५॥ ॐ जय शिव ओंकारा.....

कर मध्य कमण्डल, चक्र त्रिशूल धरता।
जगकर्ता दुखहर्ता, जग पालन कर्ता ॥ ६॥ ॐ जय शिव ओंकारा.....

ब्रम्हा विष्णु सदाशिव, जानत अविवेका।
प्रणवाक्षर दौ मध्यें, ये तीनों एका ॥ ७॥ ॐ जय शिव ओंकारा.....

काशीमें विश्वनाथ विराजत, नन्दो ब्रम्हचारी।
नित उठी भोग लगावत, सेवत नर नारी ॥ ८॥ ॐ जय शिव ओंकारा.....

त्रिगुण स्वामिजी की आरती, जो कोई नर गावें।
कहत शिवानंद स्वामी, मनवांछित फल पावें ॥ ९॥ ॐ जय शिव ओंकारा.....

जय शिव ओंकारा, स्वामी जय शिव ओंकारा।
ब्रम्हा विष्णु सदाशिव, अद्धांगीधारा ॥ १०॥ ॐ जय शिव ओंकारा.....

॥ शिवजी की आरती - भगवान् गंगाधर ॥

- ॐ जय गंगाधर जय हर जय गिरिजाधीशा ।
  त्वं मां पालय नित्यं कृपया जगदीशा ॥
  हर हर हर महादेव ॥१॥

- कैलासे गिरिशिखरे कल्पद्रमविपिने ।
  गुंजति मधुकरपुंजे कुंजवने गहने ॥
  कोकिलकूजित खेलत हंसावन ललिता ।
  रचयति कलाकलापं नृत्यति मुदसहिता ॥
  हर हर हर महादेव ॥२॥

- तस्मिंल्ललितसुदेशे शाला मणिरचिता ।
  तन्मध्ये हरनिकटे गौरी मुदसहिता ॥
  क्रीडा रचयति भूषारंचित निजमीशम् ।
  इंद्रादिक सुर सेवत नामयते शीशम् ॥
  हर हर हर महादेव ॥३॥

- बिबुधबधू बहु नृत्यत नामयते मुदसहिता ।
  किन्नर गायन कुरुते सप्त स्वर सहिता ॥
  धिनकत थै थै धिनकत मृदंग वादयते ।
  क्वण क्वण ललिता वेणुं मधुरं नाटयते ॥
  हर हर हर महादेव ॥४॥

- रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता ।
  चक्रावर्ते भ्रमयति कुरुते तां धिक तां ॥
  तां तां लुप चुप तां तां डमरू वादयते ।
  अंगुष्ठांगुलिनादं लासकतां कुरुते ॥
  हर हर हर महादेव ॥५॥

- कर्पूरद्युतिगौरं पंचाननसहितम् ।
  त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम् ॥
  सुन्दरजटायकलापं पावकयुतभालम् ।
  डमरुत्रिशूलपिनाकं करधृतनृकपालम् ॥
  हर हर हर महादेव ॥६॥

- मुण्डै रचयति माला पन्नगमुपवीतम् ।
  वामविभागे गिरिजारूपं अतिललितम् ॥
  सुन्दरसकलशरीरे कृतभस्माभरणम् ।
  इति वृषभध्वजरूपं तापत्रयहरणं ॥
  हर हर हर महादेव ॥७॥

- शंखनिनादं कृत्वा झल्लरि नादयते ।
  नीराजयते ब्रह्मा वेदऋचां पठते ॥
  अतिमृदुचरणसरोजं हृत्कमले धृत्वा ।
  अवलोकयति महेशं ईशं अभिनत्वा ॥
  हर हर हर महादेव ॥८॥

- ध्यानं आरति समये हृदये अति कृत्वा ।
  रामस्त्रिजटानाथं ईशं अभिनत्वा ॥
  संगतिमेवं प्रतिदिन पठनं यः कुरुते ।
  शिवसायुज्यं गच्छति भक्त्या यः श्रृणुते ॥
  हर हर हर महादेव ॥९॥